सामान्यलक्षणटिप्पणी

१४४५

६॰

श्लो॰
३०००

श्रीगणेशाय नमः॥ ॥व्यवस्थापयितुमित्यस्य सन्निकर्षत्वेनेत्यादिः तेन ज्ञातसामान्यस्य सामान्य
१ ज्ञानस्य वा सर्वसंमतत्वान्नासंगतिः समानाधिकरणवृत्ति धूमत्वादेर्व्याप्तिघटितोऽग्रहीतस्य त
स्यैवोपनीततया पर्वतीयवह्नेरग्रहेऽपि तद्दीपधूमे परामर्शसंभवादाह समानाधिकरणयोरेवेति प
द्येमते सचेति पर्वतीयवह्निव्याप्तिग्रहश्चेत्यर्थः लक्षणे लक्ष्यस्यानुमितित्वादिः उपाद्रुतोपीति १
व्याप्तिग्रहस्य प्रकृतस्यासिद्ध्यर्थं चिंततीयत्वादिति भावः अपि नाप्रसंगस्थापितथात्वं सूचयन्ते व्या
पकसामानाधिकरण्यमात्रं गगनादिसाधारणमतो पांपातव्याप्तिः साधननिष्ठस्य तादृशसामा
नाधिकरण्यस्य व्याप्तित्वे विशिष्टसत्त्वव्यापकद्रव्यत्वसामानाधिकरण्यवतः सत्त्वमात्रस्य गुणा
देःपरामर्शात्तत्र द्रव्यत्वानुमित्यापत्तिः किंचास्तु समानाधिकरणयोरेव व्याप्तिः तथापि द्रव्यत्वा रा म
नौदिहेतुकसत्त्वादिसाध्यकानुमितिं व्याप्तिविशिष्टेत्यादिलक्षणेन संग्रहीतद्वित्तिजातिमत्त्व १

सर्वज्ञाद्यनुमितावपि नेतव्यत्वान्नायोद्भूतः सम्भवतीत्यस्वरसः केचित्तूक्तास्वरसूचितः। वि
शेषणतानिरूपकतानतिरिक्तरूपाया अव्यवहितविषयताप्रत्यासत्तेर्मूलकृताभिधानादुभयत्रैव सामा
न्यलक्षणाशब्दं व्युत्पादयति अत्रेति यद्यपि सामान्यं च तल्लक्षणं चेति कर्मधारयस्यैव सम्भवे
बहुव्रीहिरनुचितः तथापि कर्मधारये लक्षणपदस्यानुपसर्जनत्वे सामान्यलक्षणाप्रत्यासत्ति
रिति प्रयोगो न स्यात् प्रत्युत सामान्यलक्षणां प्रत्यासत्तिरित्येव स्यात् लक्षणाशब्दस्याजहल्लिंग
त्वादतो बहुव्रीहिराद्दत इति भावः निरूपकमिति विषयतायानिरूपकमित्यर्थः केचित्तु ननु
ज्ञातसामान्यं सामान्यज्ञानं वा तत्सामान्यलक्षणा तस्याः प्रत्यासत्तित्वं कुतः षोढा प्रत्यासत्त्यनन्त
र्गतत्वादत उक्तं सा चेति तथा च तस्याः विशेषणतायामेव निवेशान्न गणितानन्तर्भावः षड्विधग
णनस्य लौकिकप्रत्यासत्तिपरतया सामान्यलक्षणायास्तदनन्तर्भावेऽपि न क्षतिरित्याशयेनोक्तमिति

रिन्द्रियेण चेद्वृत्तिषड्विधप्रत्यासत्त्यतिरिक्ते वेति तदर्थ इति मूलं व्याचक्रुः नन्विन्द्रियसंबद्धविशेषणा
तं मन्दीन्द्रियसंबद्ध इति त्वं तदा धूमत्वस्येन्द्रियसंबद्धत्वाद्व्याप्यादिधर्मत्वाभावात् तद्रूपेणावाप्यग्रहात्स
कलधूमप्रत्यक्षं तस्मादेतो व्याचक्षते तद्विशेष्यकेति तत्प्रकारक तदाश्रयप्रत्यक्षं प्रति इन्द्रियसंबद्ध
विशेष्यकज्ञानप्रकारतापन्नतद्रूपत्वेन हेतुत्वमित्यविवक्षन्नुमाह धूमत्वादिरिति प्रकारतापर्यव
विशेषणतया धूमत्वादिसामान्यस्वरूपत्वासंभवादाह विशेषणेत्यत्रेति यद्यपि भावार्थस्य विव
क्षायामपि न क्षतिः संनिकृष्टधर्मिकज्ञानप्रकारतापन्नधूमत्वादेरिव धूमत्वादिनिष्ठायाः संनि
कृष्टधर्मिकज्ञानप्रकारताया अपि स्वाश्रयाश्रयत्वरूपपरंपरासंबन्धेन धूमत्वादिप्रकारकधूमत्वा
द्याश्रयप्रत्यक्षं प्रति हेतुत्वस्य सुवचत्वात् तथापि संभान्यस्यादिप्रत्यासत्तित्वं लाघवात् ननु सामान्य
णया ज्ञातस्येति मूलग्रन्थमनुरुध्येव च भावप्रत्ययस्यार्थः परित्यक्त इति ध्येयं न तु भावार्थस्याविवक्षायां सा

चेत्यं नेसा कश्चिदिंद्रियसंबद्धविशेषणपदार्थस्याभेदान्वयो न स्यात्तन्नियामकस्य समानविभक्तिकत्वा
देस्तत्रासत्वात् स्वरूपादेवं तेनादिवत्कथंचित्तमर्थेनेपि भावप्रत्ययस्यैवैयर्थ्यापत्तिरेवेत्यत आह तत्
त्रविशेषणत्वमिति अधिकरणवत्कुत्रीहिः सर्वत्रानुत्पन्ने रखीकारादृशसंबंधपदस्येवेतितन्निंद्रि
यसंबद्धविशेषणत्वं यस्य इति वक्तु व्रीहो तादृशसंस्कारादिप्रकारतामादायातिप्रसंगः प्रकारतार्थ
कस्य विशेषणता शब्दस्य ज्ञानप्रकारता प्रतापमाधुनिकत्वापत्तिरत आह संबद्धपदस्यापि
वदंति अत्र चेति इंद्रियसंबद्धविशेष्यकज्ञानप्रकारीभूतसामान्य इत्यत्र चेत्यर्थः नतत्तदिंद्रियजन्य
त्वमिति तत्तदिंद्रियप्रयोज्यं चाक्षुषत्वादिवैजात्यर्थः यथाश्रुते चाक्षुषत्वा घटेत्त पाचक्रजन्यत्वा
नत्वादेः कारणतावछेदकत्वे गौरवापत्तेरिति ध्येयं नियामकं कारणतावछेदकताया प्रयोजकं तथा
चतत्पुरुषीय धर्मत्वादिप्रकारचाक्षुषं प्रति तत्पुरुषीयचक्षुः संनिकर्षत्वमिकतत्पुरुषीयचा

रूपप्रकारता[illegible]न्नधूमत्वा हेतुः तन्न कार्यस्यालौकिकमुख्यविशेष्यताकारणस्य तु समवायः प्र
त्यासत्तिः तेन प्राथमिकधूमत्वविशिष्टचाक्षुषक्षणकालीनोपि घटइत्यादिधूमोपनीतचाक्षुषे वान
व्यभिचारः एवं घटत्वादिसामान्यमंतर्भाव्यापि बोध्यं कारणतावच्छेदकविशिष्टस्य व्यवहितपूर्व
सत्त्वापेक्षणाज्ञानकालांतरीयचक्षुःसंयोगादिकमादायातिप्रसंगः न च लौकिकसन्निकर्षस्यानात्व
तसंयोगादेः कतरस्य निवेशः अतो जायमानप्रत्यक्षस्थले न चैवमपि पुष्पादौ त्सौरभत्व[illegible]माज्ञा
यमानस्य चाक्षुषस्य सौरभमुख्यविशेष्यकत्वं स्यात् तथा च हिरिंद्रियाणां स्वायोग्यमुख्यविशेष्य
कत्वानाजनकत्वनियमो भज्येत इति वाच्यं सामान्यभेदेन कार्यकारणभावभेदाच्चाक्षुषस्थले सौ
रभत्वाद्यंतर्भावेनाहेतुत्वे सेवा[illegible]नाच्चाक्षुषस्य सौरभमुविशेष्यकत्वासंभवादेवं स्पार्शना
दावप्युत्प[illegible]सेयः बहिः पर्यंतस्य फलमाहुः एवं चेति प्रथमे स्मरणसामान्यापेक्षितो ज्ञान

लक्षणेवसंभवतीत्यत उक्तं यत्किंचिदिति अनुपस्थितावपीत्यपि नाघटत्वे यत्किंचिद्घटोपस्थि॰
त्यादेः परिग्रह इति नोनन्यूनत्वं मानसे बोध इति तथा चालौकिकमुख्यविशेष्यतयातत्प्रकारक
मानसप्रत्यक्षं प्रति ज्ञानप्रकारतायन्नत्वेन हेतुत्वमिति भावः वचन्दने सौरभमित्यादि ज्ञाना
नरुजायमानस्य सुरभिचंदनमिति सौरभाश्रयमानसस्य सौरभप्रकारकज्ञानाजन्यत्वात् व्यभिचा
रः तत्र मानसोपनीतभानाभ्यत्वेन कार्यस्य विशेषवदंतीत्यस्वरसः तद्बीजं तु लाघवात्तत्प्रकार
कज्ञानत्वेन तद्विषयकज्ञानत्वेन वा तत्प्रकारकतदाश्रयप्रत्यक्षे हेतुत्वं न तु गंधे [illegible] इन्द्रियजन्य
त्वादिकं नियामकं इंद्रियभेदेन कार्यकारणभावकल्पने गौरवात् त[illegible]दिन्द्रियकरणकत
द्वत्ताबोधसामग्र्याः सहकारित्वोपगमादेवातिप्रसंगभंगादित्यादिकं नव्यमते व्यक्तीभविष्य
ति एतेनेति परास्तमित्यन्वयः एतेन इंद्रियसंबद्धविशेष्यकज्ञानप्रकारतायन्नस्य प्रत्यासत्ति

त्वे विवक्षणेन एतादृशनियामकत्वेन च विशेषणपदस्य धर्म्यर्थकत्वे दोषमाह धूलीत्यादि धूमद
र्शनादित्यस्यापत्तेरित्यादिः हेत्वभावेन धूमधर्मिकव्याप्तिग्रहात्मकहेत्वभावेन ज्ञानेतदिंद्रियजन्य
त्वानुक्तौ दोषमाह धर्मिणीति धर्मिणा योग्यसन्निकर्षसत्वे धर्मस्य चाक्षुषो दुर्वार इत्युक्तौ दोषव
शादिति बाष्पत्वादिभ्रमजनकदोषवशात् धूमत्वाद्यग्रहसंभवादिति भावः स्मरणेति एतेन ज्ञानप्र
कारत्वमाविष्कृतं सामान्येनेत्यस्य चाक्षुषज्ञानापत्तित्यागेनेन संबंधः लौकिकसंबंधस्यानपेक्ष
णे दोषमाह ग्रहमात्रेणेति धर्मिणे न यनेन न ग्रहमात्रेण वा सामान्येनेत्यर्थः नवं लौकिक
सन्निकर्षविगमेपि ज्ञानमात्रं चाक्षुषोत्पत्ताविष्टापत्तिरिति वाच्यं तथा सति तादृशचाक्षुषात्मक
स्यैव कारणस्य सत्त्वादुत्तरोत्तरं सामान्यजन्यापायाश्चाक्षुषधारायाः प्रसंगादिति भावः ननु सामान्य
स्य प्रत्यासत्तित्वे घटश्शून्यत्वादिप्रत्यासत्त्या तदाश्रयप्रत्यक्षं न स्यात् घटशून्यत्वादेः सामान्यत्वाभावा

४

५

४

इतः अग्रहसामान्यं चेति सामान्यलक्षणे तत्र सामान्यपदार्थश्चेत्यर्थः सखंडं स्वरूपतः प्रकारीभूतमि
त्यं अखंडं स्वरूपतः प्रकारीभूतं द्विधेति तथा च तत्र सामान्यपदं धर्ममात्रपरमिति भावः ननु घ
टत्वप्रकारेण कघटवत्ताप्रकारकप्रत्यक्षानंतरं घटवत्त्वप्रत्यासत्त्या सर्वस्य घटवतः प्रत्यक्षं तस्या
त् इंद्रियसंबद्धविशेष्यकज्ञानप्रकारतापन्नघटव्यक्तेर्घटांतरवृत्त्यसत्त्वादत आह सखंडं चे
ति क्वचिदित्यादिः तेन घटशून्यत्वस्य सखंडस्य स्वयमेव प्रत्यासत्तित्वेपि न क्षतिः परंपरेति
तथा च मे सन्निकर्षविशेष्यकचाक्षुषप्रकारतावच्छेदकीभूतघटत्वमेव घटत्वावच्छिन्नप्र
कारताकचाक्षुषं प्रति हेतुः अत्रापि कार्यस्यालौकिकमुख्यविशेष्यताकारणस्य तु स्वाश्रय
वत्त्वप्रत्यासत्तिः नच पूर्वानुपस्थितघटांतरस्य तादृशचाक्षुषप्रकारत्वायोग इति वाच्यं घट
त्वसामान्यलक्षणया सकलघटोपस्थितिदशायामेव तत्संभवादेवं दंडिमत्त्वादिसामान्यस्थलेपि

५

तादृशचाक्षुषप्रकारतावच्छेदकतावच्छेदकं द्रव्यत्वादिकमेव कारणं द्रष्टव्यं एतेन परंपरावंधे
न ज्ञानस्य घटत्वादेः प्रत्यासत्तित्वे घटत्ववदित्येव फलं स्यान्न तु घटवदित्याकारकस्वप्रका
रकप्रत्यक्षं प्रत्येव सामान्यस्य हेतुत्वादिति परास्तं ननु चक्षुःसंयुक्ते धर्मिणि समवायेन ग्र
ह्यमाणस्य घटत्वादेः कालिकादिसंबंधेन कालादावपि सत्वात्तन्मुख्यविशेष्यकमपि सम
वायसंबंधावच्छिन्नघटत्वप्रकारकचाक्षुषं स्यात् आद्येन चेति प्रत्यासत्तिः प्रत्यक्षजनिका
तथा च लौकिकमुख्यविशेष्यतया समवायादिसंबंधावच्छिन्नघटत्वप्रकारकचाक्षुषंप्र
ति समवायादिसंबंधावच्छिन्नचाक्षुषप्रकारतापन्नघटत्वादिकं समवायेन हेतुरतो नातिप्र
संग इति भावः अखंडसामान्यव्याप्यभिप्रायेणाशंकते नन्विति सामान्यतासंपत्त्यर्थमाह नाधि
धिकरणेति नानाधिकरणविशेष्यकप्रत्यक्षकारणमित्यर्थः एतेन एकमात्रवृत्तिधर्मस्यापि स्वा

५

स्वप्रत्यक्षं प्रति हेतुत्वादिदमर्थमन्यथा तद्व्यणावत्त्वं तेरपि व्याप्तिभ्रमोत्तरं तद्विशिष्टस्यप
क्षधर्मताग्रहादनुमित्यनुपपत्तेरिति परास्तं एकव्यक्तिरित्यनेनाखंडत्वे सूचितं पदार्थसंदे
विधाद्वावात्मकं सामान्यमुक्ताऽभावात्मकं तदाहतत्राभावादिवेति अनित्यइतिनित्यत्वे तु कार्य
कालेऽपि सत्तानस्य कारणत्वमव्याहतमेवस्यादिति भावः तादृशघटादिकं नाखंडसामान्यं किंतु
सखंडमित्याशयेन सिद्धांतयति तत्रापीति नच तद्व्यक्तौ घटत्वाद्युपदेपित द्व्यक्तिप्रकारेणतदा
श्रयप्रत्यक्षोत्पत्त्यानेदमयुक्तमिति वाच्यं जात्यतिरिक्तस्य किंचिदवच्छिन्नप्रकारतानियमेन तत्
घटादेः स्वरूपतः प्रकारत्वायोगात्तद्व्यक्तित्वस्यापि तद्व्यक्तितादात्म्यविशिष्टसमवायादिसंबंधे
नघटत्वादिमत्तायामेवपर्यवसानात् नचतथापि घटत्वादिसामान्यस्यदानीं स्वत्वंपित द्व्यक्तिस्व
रूपस्यसंबंधस्यासत्त्वात्तद्व्यक्तिद्वारेणतस्य कारणत्वं दुर्घटमिति वाच्यं अलौकिकमुख्यविशेष्य

६

तासंबंधेन तद्घटव्यक्तित्वावच्छिन्नप्रकारताकचाक्षुषत्वावच्छिन्नं प्रति चक्षुःसंबद्धविशेष्य
कचाक्षुषप्रकारतावच्छेदकीभूततद्व्यक्तित्वस्य स्वाश्रयवृत्तिघटविशेष्यतासंबंधेनैव हेतुत्वात्
सर्वत्रांततो नित्यज्ञानीयतादृशविशेष्यतामादायैव कारणसत्त्वसंभवादित आह भावार्थमेव तद्व्य
क्तिद्वारे तत्र द्वारपदोपन्यासादिति भावः जातीतरस्यापि स्वरूपतः प्रकारत्वोपगमे तु तत्तदनि
त्यघटादिव्यक्तेर्घटत्वाप्रज्ञानदशायां प्रत्यासत्तित्वे दुर्घटमेवेत्यत आह एतदिति द्वितीयमि
ति सामान्यलक्षणां विषयतया निरूपकं यस्या इति व्युत्पत्तिलभ्यं सामान्यज्ञानात्मकं यद्दामि
त्यर्थः घटपदार्थातिरिक्तस्यानुपगमात् सामान्यातिरिक्तमात्रस्य प्रत्यासत्तित्वे तु सामान्यस्याज्ञा
नदशायामपि तदाश्रयस्य प्रत्यक्षप्रसंगात् व्याचष्टे इंद्रियसंबद्धेति तादृशेत्ति तदिंद्रियजन्येत्यर्थः
तथा च तत्पुरुषीयघटत्वादिप्रकारकचाक्षुषत्वावच्छिन्नं प्रति तत्पुरुषीयचक्षुःसन्निकृष्टविशे

6

६

–कतदीयघटत्वादिप्रकारकचाक्षुषत्वेन हेतुत्वं अत्रापि कस्य कार्यस्यालौकिकमुख्यविशेष्यत्व
मेव कारणस्य तु स्वप्रकारीभूतसामान्याश्रयनिष्ठविशेष्यत्वं प्रत्यासत्तिः अतो न तत्तदनित्यव्यक्तिमत्त्व
स्यासत्त्वदशायां तत्प्रत्यासत्त्या तदाश्रयप्रत्यक्षानुपपत्तिः ॥ यत्तु स्वप्रकारीभूतसामान्यवदन्यावृत्ति
भेदवत्त्वमेव सर्वत्र कारणतावच्छेदकः संबंधः तत्तदनित्यव्यक्तेरसत्त्वदशायामपि तद्वद्व्यावृत्तितत्त
त्कपालान्यतरत्वरूपभेदस्य सत्त्वादिति तन्तुच्छं स्मृतिविषयत्वाद्यनित्यप्रत्यासत्तिस्थले तद्वदन्य
प्रसिद्धेः स्मृतिविषयत्वादिकेवलान्वयित्वादिति चेद्यं तत्प्रकारकतदाश्रयप्रत्यक्षे तस्य ज्ञानमा
त्रं हेतुः ननु ज्ञानस्य तत्तदिंद्रियजन्यत्वं तत्तदिंद्रियसंबद्धविशेष्यकत्वं वा तेन तेन च चक्षुरादींद्रियभे
देन पुरुषाणां द्विधानि वेशेन च हेतुकल्पने गौरवात् स्मरणाद्यात्मकसामान्यज्ञानदशायां च तद्वदा
प्रत्यक्षत्वमंततो मानसात्मकमुत्पद्यत एव प्राच्यैरपि ज्ञानावित्त्वेन तस्योपपत्त्यादित्याशयवतां न व्या

७ 7

नांमतमुत्पापपति अर्तितित्यादिनातद्विषयकज्ञानत्वेनैवहेतुत्वं अत्रंचकार्यस्याखप्रकारीभूततत्त
त्सामान्याश्रयनिष्ठविशेष्यत्वंकारणस्यतुस्वविषयीभूततत्तत्सामान्याश्रयनिष्ठविषयत्वंप्रत्यास
त्तिरतोनातिप्रसंगः नचैवंनिर्विकल्पकोत्तरंजातसघटत्वविशिष्टप्रत्यक्षस्यापियावद्घटविषयक
पत्तिः दृष्टत्वात् सामान्यप्रकारकज्ञानत्वेनहेतुत्वोपगमेपितिर्विकल्पकतृतीयक्षणेयावद्घटावगाहि
प्रत्यक्षोत्पत्त्याक्षणाविलंवस्यावश्यकत्वानेर्गतव्यत्वात् नचतद्विषयकत्वतत्प्रकारकत्वयोः समशरीरकत
यातद्विषयकत्वेनैवहेतुत्वमित्यत्रविनिगमकाभावः प्राथमिकविशिष्टप्रत्यक्षेसौरभादिविशेष्यक
ज्ञानोत्तरंजायमानेसुरभिचंदनमित्यादिप्रत्यक्षेच व्यभिचारादेवतत्प्रकारकज्ञानत्वेनहेतुत्वस्यासंभवात्
नचस्वप्रकारीभूततत्तत्सामान्याश्रयनिष्ठालौकिकमुख्यविशेष्यतासंवंनतत्तत्सामान्यप्रकारकप्रत्य
क्षेप्रत्येवतत्तत्सामान्यप्रकारकज्ञानत्वेनहेतुत्वंवाच्यमतोनोक्तदोषः कार्यतावच्छेदकसंवंधस्यगुरुत्वा ७

पत्तेः चंदने सौरभमित्यादिज्ञानोत्तरं जायमानस्य सुरभि चंदनमित्येवं सौरभाश्रयमुख्यविशेष्यकमान
सप्रत्यक्षस्य सौरभप्रकारकज्ञानाजन्यत्वेन तथापि व्यभिचारतादवस्थ्याच्च नच तद्विषयकज्ञानत्वेन हे
तुत्वे घटवदित्यादौ संसर्गविधया संयोगज्ञानादपि संयोगवत्वेन तदाश्रयप्रत्यक्षापत्तिः अतस्तत्प्रका
रकज्ञानत्वेनैव हेतुत्वमुक्तमिति वाच्यं संयोगविशिष्टबुद्धिसामान्यं प्रति सांसर्गिकान्यसंयोगविष
यताकज्ञानत्वेन हेतुतया तद्विरहादेव न तत्र संयोगविशिष्टज्ञानासंभवात् सांसर्गिकसाधारणत
द्विषयताकज्ञानत्वेन तद्विशिष्टबुद्धौ हेतुत्वस्वीकारे तु तत्रापि नत्र संयोगविशिष्टज्ञानासंभवात् सां
सर्गिकसाधारणतद्विषयताकज्ञानत्वेन तद्विशिष्टबुद्धौ हेतुत्वस्वीकारे तु नत्रापि तत्र संयोगविशिष्ट
ज्ञानोत्पादेन तस्यपावत्संयोगाश्रयविषयकत्वोपगमेपि दात्पभावात् वस्तुतस्तु तद्विषयकज्ञान
त्वमात्रेण हेतुत्वे समवायेन घटत्वप्रकारकज्ञानात्कालिकादिसंबंधेन तदाश्रयस्य कालादेः प्रत्यक्षे

८

४

पत्यात्तत्संबंधावच्छिन्नतत्प्रकारकतदाश्रयप्रत्यक्षं प्रति तदितरसंबंधानवच्छिन्नतन्निष्ठविषयताक
ज्ञानत्वेनैव हेतुत्वं वाच्यं न तु तत्संबंधावच्छिन्नतत्प्रकारकज्ञानत्वेन तथा सति सुरभि चंदनमित्यादि प्रा
गुक्तमानसोपनीतभाने व्यभिचारभिया तत्तद्बुद्धिभिन्नत्वस्य तत्प्रकारकज्ञानाव्यवहितोत्तरत्वस्य वा का
र्यतावच्छेदकेऽनुप्रवेशे महागौरवापत्तेः नचैकसंबंधेन तत्प्रकारकप्रत्यक्षदशायां संबंधांतरेण तत्प्रका
रकप्रत्यक्षे यदि बाधकं संभवस्तदोत्तरकालं संबंधांतरेण तदाश्रयप्रत्यक्षे स एव प्रतिबंधकः अन्यथा उ
नरिष्टमेव तदानीं संबंधांतरेण घटत्वस्याश्रयस्य प्रत्यक्षे अतस्तद्विषयकज्ञानत्वेनैव लघुना हेतुत्वं न
तु तदितराघंतर्भावेऽयोवितमिति वाच्यं समवायेन घटत्वप्रकारकानुमित्यनंतरं जातस्य तत्संबंधेन घट
त्वाश्रयप्रत्यक्षस्य संबंधांतरेण तदाश्रयविषयकत्वस्य दुर्वारतापत्तेः तादृशानुमितिदशायां संबंधांतरे
ण घटत्वस्य परामर्शाद्यभावादेव संबंधांतरावच्छिन्नघटत्वप्रकारकज्ञानानुत्पत्त्या तत्र बाधकस्याकल्प

नादिति ध्येयं नन्विन्द्रियभेदेन नानाकार्यकारणभावस्य परित्यागे घटत्वप्रकारकतदाश्रयप्रत्यक्षमेवंक
चिन्नात्वषंकचित्स्पार्शनंजायतइत्यत्रानयामकमित्यतआह अपेक्षणीयंचेति धूमादौवाष्पत्वादिभ्रमज
नकदोषदशायांचक्षुःकरणकबोधसामग्रीसत्वेपि धूमत्वादिप्रकारकंनतदाश्रयस्यचाक्षुषंजायतेइत्यत
स्तद्धर्मवत्त्वबोधानुसरणंसामग्र्यंतरेमतिनिथाचतत्तद्विशेषसामग्रीतएवचाक्षुस्पार्शनादिनियमइ
तिभावः कारणांतरमुपेक्ष्यसामग्र्यंतरपर्यंतापेक्षायाः फलमाह अतएवेति अंधतमसंनिबिडंतमः सौ
दामिनीसंपातः तडित्संयोगः आलोकस्यपश्चादसत्वलाभायसौदामिनीपर्यंतानुसरणंचरमंविघुत्सं
पातजन्यचाक्षुषोत्तरं द्रव्येति द्रव्यत्वसामान्यमधिकृत्योक्तं अत्रदोषविशेषवशात्तमोधर्मिकस्यै
वचक्षुःकरणकद्रव्यत्ववत्ताबोधस्यसामग्रीसत्वाच्चरमंनिखिलतद्व्यचाक्षुषोदुर्वारएवपरंतुउक्तस्थ
लेघटत्वादिनाघटादेश्चाक्षुषसत्तानवारणार्थमेवसामग्र्यपेक्षावाच्येतितुविभावनीयंहित्रिसाहा

त्कारस्योपगमे ह्त्यभावादाहसंज्ञानमिति तथा च तादृशचाक्षुषधारानुभवगम्यावितेति भावः अत्र के
चित् चक्षुरादीन्द्रियान्तर्भावेन सामान्यज्ञानस्याद्धेतुत्वे सौरभत्वप्रकारेणापि किंचित्सौरभज्ञानोत्तरं जायमा
नस्य सुरभि चंदनमित्यादिचाक्षुषस्य पूर्वानुपस्थिततया तत्सौरभमुख्यविशेष्यकत्वापत्तिः सामान्यप्रत्या
सत्तेरविशिष्टत्वात् न च प्रापत्तिः बहिरिंद्रियस्य स्वायोग्यमात्रनिष्ठमुख्यविशेष्यताकज्ञानाजनक
त्वनियमात् अस्मन्मते तु सौरभत्वसामान्यज्ञानस्य सौरभत्वप्रकारकतदाश्रयघ्राणजत्वावच्छिन्नप्र
ति तादृशमानसत्वावच्छिन्नं प्रत्येव वा विशिष्य हेतुत्वकल्पनान्न तादृशं चाक्षुषमित्याहुः तन्न सौर
भमुख्यविशेष्यकस्मानस्यानुमित्युपमितिशाब्दबोधघ्राणजादिस्वरूपस्येव पारमार्थिकत्व
यातन्मुख्यविशेष्यकानुमित्यादिसामग्रीविरहादेव तदानीं तादृशज्ञानोत्पसंभवादनुमित्यादिभि
न्नस्य तादृशज्ञानस्यालौकिकतयापादयितुमशक्यत्वात् वस्तुतो मुख्याविशेष्यत्वसंबंधेन सौरभत्वादि

प्रकारकचाक्षुषप्रतीतौ तादात्म्येन सौरभत्वादिना गंधत्वादिना वा प्रतिबंधकत्वात्तन्निरासः। तादृ
शसंबंधेन न तथाविधचाक्षुषं तु घटादौ च सौरभत्वस्य भ्रमरूपं सुरभं न च सौरभत्वप्रकार
केति व्यर्थः। प्रमेयत्वादिसामान्यप्रत्यासत्त्या तादृप्येण सौरभमुख्यविशेष्यकचाक्षुषस्य एक
त्वसंमतत्वात्तत्रापि चक्षुर्योग्यमात्रविशेष्यकत्वोपगमेतन्नोपपादोपनेये वं घटाद्युपनीतचा
क्षुषस्यापि घटादिमुख्यविशेष्यकत्वं स्यात् उक्तकार्यकारणभावस्यैवापादकत्वादिष्टापत्तौ चो
पनीतविशेषणतयैव भासतत्वस्य विशेष्य इति वाच्यं मुख्यविशेष्यतया द्रव्यचाक्षुषत्वा
द्यवच्छिन्नं प्रतिचक्षुरादिलौकिकसन्निकर्षाभाववविशिष्टज्ञानत्वेन विषयतया प्रतिबंधकत्वा
त्तत्र तत्संत्यपि मूर्तत्वादिज्ञाने लौकिकसन्निकर्षदशायां तन्मुख्यविशेष्यकलौकिक
प्रत्यक्षमिति ध्येयं गंधादेरचाक्षुषत्वोपपत्तये चाक्षुषादिकं प्रति तादात्म्येनावच्छेगंधत्वादिनाप्र

तिबंधकत्वं वाच्यं तथा च तन्नैव लौकिकविषयतामात्रं न प्रतिबध्यतावच्छेदकः संबंधः किंतु मुख्य
विशेष्यत्वनिरूपकविषयत्वयोरन्यतरदेव संबंधानुगमस्य स्वरूपसंबंधेन हेतुतावच्छेदके एव
सद्भासितत्वात्तत्प्रकारतात्वविषयत्वं वा तादृशसंबंधो वाच्यः सुरभिचंदनमित्यादिचाक्षुष
चंदनांशे प्रकारेण सौरभत्वांशे विशिष्यतानवच्छिन्नत्वं तत्प्रतिबंधकसंवादे चाक्षुषज्ञानं
न सौरभमुख्यविशेष्यकमित्यपि वदंति तन्न चिंत्यं केचित्तु घटत्वपटत्वादीनां तद्रूपप्रकारकज्ञानानां
वा वह्न्यादीनां प्रत्यासत्तित्वे कार्यकारणभावानंत्यप्रसंगात्सर्वत्र नित्यज्ञानव्यक्तिरेव प्रत्यासत्तिः स्वं
तत्समवेतसाश्रयविशेष्यकप्रत्यक्षत्वावच्छिन्नं प्रति स्वेतद्बुद्धिव्यक्तित्वेन हेतुत्वं नित्यज्ञानस्य
केः सर्वदा सत्वात् यत्किंचित्संनिकर्षदशायां अनंतद्रव्याचरनिर्विकल्पकोत्पत्त्यापात तदुत्तरसर्वज्ञापत्तिर
तः स्वाश्रयविशेष्यकत्वानुसरणं स्वाश्रयवृत्तिविषयतया ग्राह्यः न च ज्ञानव्यक्त्या स्वपत्वाविशेषा

हूटत्वस्मारकप्रत्यक्षकाले पटत्वेन पटसामान्यप्रत्यक्षापत्तिः पटत्वज्ञानदशायां इष्टापत्तेः अन्यथा
विशेषणज्ञानविरहादेव तदसंभवात् नापि घटत्वेन घटस्य प्रत्यक्षदशायां तादृश्येण सामान्यपये
दे: प्रत्यक्षापत्तिः घटत्वप्रकारेण पटग्रहस्य भ्रमत्वापात्तज्जनकदोषविरहादेव तस्याप्यसंभवा
त् अन्यथा तु घटत्वादिज्ञानस्य प्रत्यक्षापत्तितापाद्द्रव्यत्वघटत्वयोरुपस्थितौ द्रव्यत्वेन पटप्रत्यक्ष
दशायां घटत्वेनापि पटस्य प्रत्यक्षापत्तेर्दुर्वारत्वात् तादृशदोषसत्त्वे च तथाविधभ्रमस्येष्टत्वात् न चावि
निगमनाविरहात् उद्गमनाभावादीनां मयि तत्तत्संयोगाभाववत्त्वानां च तत्तद्व्यक्तित्वेन स्वाश्रयविशे
षकप्रत्यक्षं प्रति हेतुतापत्तिरिति वाच्यं गगनाद्यभावानामन्यथासिद्धत्वात् कार्यमात्रं प्रति हेतोर्नित्यज्ञा
नस्य स्वाश्रयप्रत्यक्षेऽप्यन्यथासिद्धत्वात् गगनाद्यभावानां तादृश्येण हेतुत्वेऽपि लाघवसंभवाच्च घ
टत्वादिज्ञानत्वेन हेतुतायां घटत्वादिप्रकारकतदाश्रयप्रत्यक्षत्वस्य कार्यतावच्छेदकतागौरवाप

नेः सुरभिचंदनमित्यादेः सौरभत्वाद्यविशेष्यकप्रत्यक्षस्यानुरोधादेव सौरभत्वादेर्ज्ञानलक्षणायाः
स्वीकार्यत्वादित्याहुः ननु सामान्यपदेन प्रत्यासत्तिः किंतु तज्ज्ञानं दोषे ज्ञानलक्षणायास्संदेहे तस्याः को भेद इ
त्यत आह इयं चेति सामान्यलक्षणा चेत्यर्थः इतरथा ज्ञानलक्षणा तस्येति प्रत्यासत्तिरित्यनुपपद्यते तथा च का
र्यकारणभावभेदादेव प्रत्यासत्त्योर्भेदव्यवहार इति भावः नन्वत एवेति अत एव ज्ञानलक्षणाया अतिरिक्त
प्रत्यासत्तित्वस्वीकारादेव अन्यथा सौरभत्वजात्युपस्थित्यनंतरं सुरभिर्गंध इति वत्सुरभि चंदनमित्या
कारकं सौरभत्वप्रकारेण चंदनस्य भ्रमात्मकचाक्षुषं तत्र सौरभत्वजातेर्भानं न स्यात् नहि तत्र सुर
भिगंधस्य भानसंभवः येन सामान्यलक्षणायास्तद्धर्मप्रकारकतादृशप्रत्यक्षं प्रत्येव हेतुतया सौरभ
त्वप्रत्यासत्तेः कार्यतावच्छेदकतयैव सौरभत्वजातेर्भानं भविष्यतीति संभावनीयं चक्षुषो बहिरिंद्रिय
त्वेन स्वसंयोगप्रमुख्यविशेष्यकज्ञानाजनकत्वनियमात् पूर्वानुपस्थितस्य सुरभिगंधस्य तत्र भाना

संभवेन उक्तरीत्या तद्गतजातेरपि तत्र भानासंभवादिति भावः इत्थं दावित्यादिपदे तन्मतांतरस्य तद्
नुव्यवसायस्य च परिग्रहः यत्तु ज्ञानस्य तदिंद्रियजन्यत्वे नियामकमिति पूर्वमतेनाप्ययमर्थः तथा च सौ
रभत्वेन सौरभत्वेन सौरभस्मृत्यनंतरं जायमानयोः सुरभि चंदनमित्याकारकचाक्षुषप्रमायोः सामा
न्यप्रत्यासत्त्या न सौरभत्वस्य भानसंभवः कारणीभूतस्य सौरभत्वचाक्षुषस्याभावात् अत्रोक्तौ ज्ञानल
क्षणा एवालौकिकप्रत्यासत्तिरिति मतेनेदं ज्ञानस्य तदिंद्रियजन्यत्वापेक्षायां सुरभिगंधस्यापि तत्र भाना
संभवेन सौरभत्वजातिपर्यंतानुसरणस्य संदर्भविरोधापत्तेः अत्रेदं तत्त्वं यद्यपि घटत्वादिप्रत्यक्षे तद्
लौकिकप्रत्यक्षे वा न तद्गोचरज्ञानत्वेन ज्ञानलक्षणाया हेतुत्वं घटत्वादिनिर्विकल्पके प्रमेयत्वादिसा
मान्यलक्षणाजन्यघटत्वादिप्रत्यक्षे च व्यभिचारात् तथापि लौकिकालौकिकसाधारणघटत्वादिप्रका
रकप्रत्यक्षमात्रे प्रत्येकं घटत्वादिज्ञानत्वेन हेतुत्वं अत एव प्राथमिकस्य घटत्वचैत्रत्वादिप्रकारकप्रत्य

११

12

त्मस्य घटत्वेनेत्यादिनिर्विकल्पकं विनानुपपत्तेस्तत्सिद्धिरप्यावश्यकी पूर्वानुभूतवस्तुमात्रस्यैवत
त्तात्वेन घटत्वाद्यात्मकतत्ताप्रत्यभिज्ञानंतु रोधेनैव परैरप्युक्तकार्यकारणभावस्याभ्युपेतव्यत्वात् नं चैवज
न्मसविकल्पकं सेव प्रत्यासत्तित्वमिति प्राचीनगाथाविरोधस्तस्याकिंचित्कारत्वात् सत्वं घटादेरुपनी
तभानस्थलेस्वर्ततपनियमसंभवाच्च द्रव्यत्वादिप्रकारेण घटादेरुपनयसत्वेपि घटत्वादिप्रकारेणातस्यो
पनीतप्रत्यक्षानुदयेन घटत्वादिनातत्तद्घटादिप्रकारकप्रत्यक्षप्रति घटत्वादिप्रकारेणोपनततत्तद्घटाद्युपन
यस्य हेतुत्वात् अत एव घटघटत्वयोर्निर्विकल्पकोत्तरं घटे घटत्वस्येव घटत्वेपि न घटस्य वैशिष्ट्यावगाहि
प्रत्यक्षं इत्यत्र घटत्वादिप्रकारेण घटादीनां विशिष्टबुद्धेः पारमार्थिकतयातद्धेतुभूतस्य घटत्वादिप्र
कारेण घटादिज्ञानस्य तदानीमसत्वात् नं चैवं निर्विकल्पकोत्तरं विशेष्यविशेषणमित्यादिक्रमेणा
पि घटवदित्याकारकं प्रत्यक्षं न स्यात् दृष्टत्वात् जातीतरनिष्ठप्रकारतायाः किंचिदवच्छिन्नत्वनियमात् द्रव्य

११

गुणकर्मणोर्निरवच्छिन्नप्रकारत्वाननुभवात् न च निर्विकल्पकस्य प्रत्यासत्तित्वे स्वविषयीभूतघट
त्वाद्युपधानेन तत्प्रत्यक्षापत्तिः विषयानुपधानेन तज्ज्ञानादिप्रत्यक्षस्यालोकतया विषयोपनायकस्यवि
रहादेव मनःसन्निकृष्टस्यापि तस्यातीन्द्रियत्वोपगमादिति वाच्यं सत्यपि सन्निकर्षे प्रत्यक्षसामान्य
प्रत्येवादृष्टत्वादिनेव निर्विकल्पकत्वेनापि तादात्म्यसंबंधेन विरोधिकस्यनादेव निर्विकल्पकस्याप्र
त्यक्षत्वात् अन्यथा सुखत्वादिनिर्विकल्पकस्य स्वविषयीभूतसुखत्वाद्युपधानेन साक्षात्कारस्यो
दुर्वारतापत्तेः सुखत्वस्य निर्विकल्पकद्वयसुखत्वेपि लौकिकस्यैव मनःसन्निकर्षस्य सत्त्वादुपधाने
न तन्निर्विकल्पकस्य प्रत्यक्षे बाधकाभावादिति। परन्तु घटादिप्रकारकप्रत्यक्षं प्रत्येव घटादिज्ञानहेतु
त्वे घटादिविशिष्यकं घटो द्रव्यमित्याकारकमानसं योपनीतभानं तस्यादिति तन्न घटादिधर्मिकद्र
व्यत्वाद्यसंसर्गाग्रहादिवशादेव मानससिद्धियो घटादिविशिष्यकत्वसंभवात् घटद्रव्यत्वेतावन्मात्राः

१२ 13

कारस्य वाच्य निर्णीयाप्रतिवध्यमानसप्रमत्वस्य सत्वेपि तदभावात् नचैवं घटत्वेन घटादेरनुप
स्थितिदशायां तद्विशेष्यकं मानसप्रत्यक्षं स्यात्तद्धर्मिकसंसर्गाग्रहस्य तदानीमपि सत्वात् इति वाच्यं
घटप्रकारकप्रत्यक्षत्वस्य घटनिष्ठलौकिकविशेष्यताकप्रत्यक्षत्वव्यापकतया तदवच्छिन्नं प्र
ति हेतुभूतस्य घटज्ञानस्य विरहादेवानुपस्थितघटादिविशेष्यविषयमानसग्रहासंभवात् घटो
द्रव्यमित्यादिमानसस्य घटं जानामीत्याकारकत्वनियमात् अत एवोपनीते विशेषणतये वभा
सत इत्यभिधायमानसेत्वनियम इति प्राचीनैरप्युक्तमित्यलं पल्लवितेन॥ ॥व्याप्तेः सामानाधि
करण्यस्वरूपत्वे परामर्शस्य भ्रमत्वापत्तिः अतो भावार्थमाह धूमेत्यादिना लाघवादाह वह्निम
द्भिन्न च केवलान्वयिन्यव्याप्तिः व्यतिरेकानुमानस्येव परैः स्वीकारादिति भावः केवलान्वयिनः
संग्राह्यत्वेपि लघुव्याप्तिमाह साध्यसंबंधितेति अवच्छेदकत्वस्वरूपसंबंधविशेष इति हृदयं ते

१२

नप्रागुक्तावच्छेदकत्वघटनपागुरुत्वात्तवकाशःस्येतिसामानाधिकरण्यपा अवच्छेदकत्वपत्वाह्नि
तस्य धूमत्वादेः सकलधूमनिष्ठत्वादिति भावः व्याप्तिर्नानात्वे इति सामानाधिकरण्यस्वरूपतयेत्या
दिः तत्र पर्वतीयधूमे अथानभवस्मरणायोः समानप्रकारकतामात्रेणैव हेतुमद्भावेपूर्वोगृहीते
स्यापि स्मरणाभावे नैस्यांदिति स्मृतेरगृहीतग्राहित्वेन तन्मते प्रामाण्यापत्तिरित्यन्यथापोजयति
शक्त्यनुभवेति अत्र शक्यस्मृतेरिव शक्त्यनुभवस्यापि सात्वादेव शाब्दधीजनकत्वे हेतुपदं यथाश्रु
तार्थकमेव अन्यथा तत्र योजकपदं कोध्य एवमिति गात्वप्रकारेणागो धर्मिकशक्तिग्रहस्य शाब्दधीहे
तुत्वइत्यर्थः धर्मिणि शक्तिसत्वेपि तद्विषयकत्वस्य शाब्दधीजनकतानवच्छेदकत्वात् तेनाप्रकृत्वव्य
वहार इति कुत्र शक्तिवादिनः श्रीकरस्य मतमनुसृत्याह जातौ व्यक्तौ चेति जातिविषयत्वेनैवेति जा
तिप्रकारकत्वेनैवेत्यर्थः तेन मूलोक्तसमानप्रकारकत्वेन हेतुत्वस्य न विरोध अनुभावयति शाब्दबोधजं

१८

14

नयति । तदर्थं जातिशक्तिग्राहकस्यार्थतः कस्यचिन्मतमाह पश्वादीति । पशुत्वस्य संस्थानाव्यङ्ग्य-
त्वात् । उक्तं हि । अवयवनिष्ठतया तेजस्त्वादिना सांकर्याच्च । लोमवत्त्वं लाङ्गूलवत्त्वमेव पशुत्वं तस्य चोपाधि-
त्वेन च सांकर्यसमं तु स्यादिति विघटनाभावात् तादृशोपाधिविशिष्टधर्मिण्येव परैः शक्तिस्वीकारादिति भा-
वः । पृथिवीत्वादिप्रत्येकव्याप्यापादनान्नैव पृथिवीमात्रवृत्तिर्वा पशुत्वजातिः पशुपदशक्या-
स्यात् पीतसुवर्णस्यैव उक्तं हि । अवयवोऽपि तेजसत्वप्रवादस्य तेजोभागे स्योपष्टंभकतयाप्युपपत्ति-
स्तदाह । लिङ्गमुख्यादीति । यजेतेत्यादौ कार्यत्वप्रकारेण यद्यपि लिङः शक्तिग्रहं दूगगविषयकं
कार्यमित्यन्वयबोधयोग्यताबलात् तद्रूपेण पूर्वं व्यक्तिलाभस्य परैर्वक्तव्यमाणत्वादिति भावः । का-
र्येऽर्थे उक्तादि शक्तेस्तु किं कौरनंगीकारादेककार्ये शक्तिग्रहाद् परकार्यस्यबोधानुपपत्तेरुक्तेः शंकि-
तुमशक्यत्वादाह परेति । परेत्यान्योपमते नान्यापमते न समर्थनं चेत्यस्वरसः कश्चिदित्यनेन सू-

१८

स्वितः यद्यपि गोपदस्य नानार्थत्वेन यत्र वाक्यत्वप्रकारेण वाक्यस्येंद्रियत्वप्रकारेण इंद्रियस्य वा बो
धकं गोपदं तत्र वाक्यत्वादिरूपावच्छिन्नतद्विशिष्टव्यक्तौ शक्तेः परेषामपि स्वीकाराद्गवादिपदेष्व
पीति मूलं तदभिप्रायेणैव साधुसंगच्छते तथापि लाघवेन गोत्वादिशक्तेन गवादिपदेन लक्ष
णयैव वाक्यत्वादिप्रकारकबोधोपपत्तौ न वाक्यत्वादिविशिष्टगोपदस्य शक्तिर्गोत्वादित्वा
श्रयेन तादृशाभिप्रायो मूलस्कृतो ।अत्र गोपदवदित्याकारकस्य पदविशेष्यकशक्तिज्ञानस्यैव
शाब्दधीहेतुत्वात् गोत्वप्रकारतामादायैव सामानप्रकारकत्वेन हेतुत्वसंभवात् यथाश्रुतमेवमू
लं सम्यगिति तु मैथिलाः ।पद्विशिष्टज्ञानमिति-जन्यं यत्प्रकारकं ज्ञानमित्यर्थः तेन नित्यज्ञानेन
व्यभिचारः परेषां च व्यर्थविशेषणत्वं न बोध्यायेति भावः ।तद्धीसाध्यत्वं च समवायसंबंधावच्छिन्नं
ग्राह्यः नातः परेषामीश्वरज्ञानजन्यत्वसिध्येर्वार्यांतरं त्वथाभावत्वादिज्ञानं विनापि तद्विशिष्टप्र

१५

त्वहेत्वादावव्यभिचार इत्यत आभावत्वेति अन्यथा विनाशप्रभावत्वज्ञानमपेक्षो किं कस्याप्यभाव
त्वविशिष्टप्रत्यक्षस्य प्रसंगात् लौकिकान्यतरस्वकारताकज्ञानं प्रति तज्ज्ञानत्वेन हेतुत्वे गौरवा
दिति भावः । यत्तत्त्वपोर ननुगमादाह वह्नीति । वह्निर्विलक्षणज्ञानत्वेन त्वर्थः । वैलक्षण्यं च
नातः पूर्ववद्व्यभिचारः । अथ वह्न्यंतरज्ञानजन्यत्वेन सिद्धसाधनं । न च वह्नित्वेन गुंजादेर्धूमव्या
पकत्वग्रहोत्तरं जायमानानुमितेर्वह्न्यंतरज्ञानजन्यत्वबाधात्तेनैव प्रकृतवह्निज्ञानजन्यत्वसि
द्ध्यर्थं सामान्यलक्षणा स्यादिति वाच्यं । गुंजायां वह्नित्वग्रहस्य तदधीनानुमितेश्च गुरुमते ऽसंभ
वात्तेषामन्यथाख्यात्यभावात् अत आह तद्धर्मेति ननु अपदेशोद्देश्यमानित्याद्यनुमितौ विशे
षणतावच्छेदकीभूततत्तद्धूमानार्थं । सामान्यलक्षणापत्तेराह विशिष्येत्यादि । नन्वेवं विशेषण
तावच्छेदकप्रकारकज्ञानविरहेऽपि सुरभिचंदनमित्यादिविशिष्टवैशिष्ट्यधीः स्यादत आह व १५

स्तुत इति । तथा च तादृशबुद्धेः प्रत्यक्षत्वादिनियतत्वेन तदानीं प्रत्यक्षत्वादिसामग्रीविरहादेव तादृशं ज्ञानमि
ति भावः । विशेषणतावच्छेदकादीनामित्यादिपदाद्विशेष्यादिसंग्रहः । तादृशं विशिष्टवैशिष्ट्यावगा
हि अनुमित्यादिस्थितिः तादृशमिति लिंगव्याप्त्यपेनानुपपत्तेः तादृश्येण विशेषणतावच्छेदकरूपेण
येन रूपेण व्यापकतायाः शक्तेर्वा ग्रहः तेन रूपेणानुमितेः शाब्दस्य चोत्पत्तेरिति भावः । अत एव इंद्रिय
सन्निकर्षादेर्नियामकत्वादेव तज्ज्ञानार्थं विशेषणतावच्छेदकभानार्थं । ननु विशेष्यादिसन्निकर्षेण दं
डत्व दंडयोर्निर्विकल्पकोत्तरं दंडत्वस्यैव दंडत्वादेतद्दंडादेर्विशिष्टप्रत्यक्षानुत्पत्त्याऽवश्यं दंडत्वादि
ना तद्दंडादेर्विशिष्टबुद्धौ विशेषणतावच्छेदकीभूत दंडत्वादिना तद्दंडादेस्तत्र हेतुः एवं दंडो रक्तो नवे
ति संशयोत्तरं रक्तदंडवानिति विलक्षणबोधानुत्पत्त्या तत्र विशेषणतावच्छेदकप्रकारकनिश्च
योऽवश्यं हेतुरतस्त्राह अत्र स्तुवेति । स्मृतौ व्यभिचारात् तादृशज्ञानमात्रे हेतुत्वासंभवादाह । प्रत्यक्ष

१६

16

इति विशेषणतावच्छेदकांशे धर्मितावच्छेदकासत्त्वसत्त्वाभ्यां विशिष्टवैशिष्ट्यबुद्धेर्द्वैविध्यादाद्यामु
दाहरति त्वद्वितीयामाह दंडसंयोगवानितीति · यत्किंचिदिति · तथा च विशेषणव्यक्तेः पूर्वमभानेऽपि न क्ष
तिरिति भावः व्यतिरेकेण घटादेरन्वयेन च गोत्वादिसाध्यकानुमितेर्दृष्टांतत्वसंभवादाह विशेष
णज्ञानत्वेन हेतुत्वस्येति · निरस्तत्वादित्यग्रेणान्वयः · विशेष्यज्ञानादीत्यादिपदेन संबंधज्ञानसंग्रहः
।कारणत्वापत्त्येति · तथा च तद्दिदृक्षाप्रयोजकत्वमिति भावः · विशेष्यधियो हेतुत्वे स्वमात्रोपपत्ते
रहमानाभावेन चेति · एतेन मानाभावेन निरस्तमित्यन्वयः । ननु सामान्यलक्षणाजन्यज्ञानेऽसंनि
कृष्टघटांतरस्यापि विशेष्यत्वात्तस्य च प्रागनुपस्थितत्वेन विशेष्यज्ञानस्य हेतुत्वं दुर्घटमत आह ज
न्यतां चेति · निर्विकल्पकमनुपस्थितस्याश्रयस्याप्रकारकं · तथा च तत्रानुपस्थितघटांशे निर्वि
कल्पकात्मकमेव यावद्विषयगोचरज्ञानमतो नोक्तदोषः · घटत्वादिसामान्यस्य च स्वेतरप्रकारत्वानि १६

रूपितघटनिष्ठविषयतासंबंधेनैव घटत्वप्रकारकप्रत्यक्षं प्रति हेतुत्वेनावश्यमतो विनापि घटत्वस्य ज्ञाने
द्रव्यत्वादिसामान्यज्ञानात् घटस्य प्रत्यक्षोत्पादे ऽपि न व्यभिचार इति भावः । नन्वेवं मेयत्वादिसामान्यलक्ष
णया घटत्वपटत्वादिघटपटादिपूर्वानुपस्थितयावद्वस्तुनिर्विकल्पकोत्पत्तावुत्तरकाले घटादौ घट
त्वादिनिश्चये बाधकाभावेन तदुत्पत्त्या सर्वज्ञं स्यात् । नचेष्टापत्तिः तथासति प्रमेयत्वादिसामान्यप्रत्या
सत्तिजन्यज्ञानोत्तरं अयं घटो न वा घटो द्रव्यं न वेत्यादिसंशयानुत्पत्तिप्रसंगात् अतआह सार्वज्ञ्येति । यत्तु के
श्चिदुक्तं मेयत्वादिसामान्यलक्षणया घटत्वज्ञानोत्पत्तिकाले तद्वृत्तिधर्मस्यापि निर्विकल्पकाजननादु
त्तरकाले घटे घटत्वस्येव घटत्वेऽपि तद्वृत्तिधर्माणामवच्छेदं भानं सामग्रीसत्वात् तथा च घटत्वांशे ऽन्याप्र
कारकज्ञानासंभवान्न सर्वज्ञापत्तिरिति । तत्तुच्छं घटत्वांशे ऽन्यप्रकारकस्येव तदंशे ऽन्याप्रकारकस्यापि
ज्ञानस्य सामग्रीसत्वेनोत्पत्तिसंभवात् जातिमान् घट इत्याकारकप्रत्यक्षानुरोधेन निरवच्छिन्नघटत्वादि

१७

17

प्रकारकज्ञानं प्रतिनिरवच्छिन्नघटत्वादिविषयकज्ञानत्वेन हेतुत्वात्। अन्यथा घटांशे घटत्वमिव घ-
टत्वांशेपि जातित्वमवगाहमानस्यैव ज्ञानस्योत्पत्त्या जातिमानित्येव धीः स्यात् न तु जातिमान् घट इत्याका-
रिकेति दिक्। तस्यास्तदजनकत्वेति। सामान्यप्रत्यासत्तेर्निर्विकल्पकाजनकत्वेत्यर्थः। नत
एवेति। सामान्यजन्यज्ञाने व्यभिचारादेव विशेष्यज्ञानं न कारणमित्यर्थः। ननु धर्मिज्ञानस्य संश-
येहेतुत्वे मानाभावात् असन्निकृष्टधूमादौ नामज्ञानेपि तद्धर्मिकः संशयो भविष्यतीति व्यर्थं त-
ज्ज्ञानार्थं प्रत्यासत्तिकल्पनमत आह धर्मीत्यादि। संशय एवेति। संदेहस्य प्रत्यक्षत्वरूपतया धर्मीन्-
द्रियसन्निकर्षं विना तद्विषयकत्वासंभवादिति भावः। ननु संशये धर्मिभानार्थं धर्मितावच्छेदक-
प्रकारकं कस्यचिदेव ज्ञानं हेतुरस्तु कृतं सामान्यलक्षणयेत्यत आह धर्मीतीति। अविवादादि-
त्यस्य सामान्यप्रत्यासत्त्याविषयत्वादिः स्वविवादस्यैव विरहणेति। तद्धर्मित्यादि। प्रकारकेति। यथा

१७

च सामान्यप्रकारकत्वेनैव हेतुत्वं न तु तद्विषयकत्वमात्रेण तथोक्तमस्माताता धूमत्वेनेति । तद्

वच्छेदेनेत्यर्थः । तेन ध्वनितधूमत्वावच्छेदेन वह्निव्याप्यतानिश्चयस्य धूमत्वप्रकारत्वेपि तद्धूमे र्

धूमो वह्निव्याप्यो न वेति संदेहसत्तादशानिश्चयेन धूमत्वस्यावच्छेदकत्वानवगाहनात् । परंतु धू

मत्वेनैतस्य धूमत्वमात्रावच्छिन्नविशेष्यताकेत्यर्थकरणान्नोक्तदोष इति । ननु चेद्वह्निव्याप्यो

धूमः संदर इति धूमत्वसामानाधिकरण्येन व्याप्तिनिश्चयेपि वह्निव्याप्यो धूमः कुरूप इति धूम

धर्मिकव्याप्त्यभावज्ञानोदयादवच्छेदकत्वावगाहिन एव ज्ञानस्य प्रतिबंधकत्वादित्यन्यत्र

विस्तरः । व्याप्तिज्ञानं व्याप्तिनिश्चयः प्रसिद्ध इति । धूमत्वावच्छेदेन व्याप्तिनिश्चयस्यैव विरो

धिनः सत्त्वादिति भावः । तद्विरोधिता धूमो वह्निव्याप्यो न वेति संदेहविरोधितायाः संदेहना

नुपपन्न इत्यस्य प्रसिद्धधूमत्वादिः । तथा च कृते सामान्यलक्षणायामिति भावः । ननु लाघवात्तदभाव

१८

18

निश्चयत्वे नैव सामान्यविशेष्यत्वप्रत्यासत्त्या तद्वृत्तौ बुद्धिं प्रतिविरोधितान्नैवमतस्तत्र प्रतिबंदिमा
ह कथमित्यादिना पृथिव्यादीति समानधर्मिकस्यैव ज्ञानस्य विरोधित्वे पार्थिवं तैजसं जलीयं च
रूपं वायुत्वाभावव्याप्यमित्येवं निर्णीयरूपं वायुत्वाभावव्याप्यं न वेति रूपविशेष्यकसंशयो न स्यात्तद्रूप
मात्रे विरोधित्वासिद्धिर्निष्पादतः समानधर्मावच्छिन्नविशेष्यकज्ञानस्यैव विरोधित्वाच्यमिति भा
वः। न चेति वाच्यमित्यग्रेऽन्वयः। संभावनयेति पार्थिवादिरूपभिन्नं रूपं न वेत्याद्याकारकसंभाव
नयेत्यर्थः। तथा निर्णीतव्याप्तिकेष्वपि रूपेषु व्याप्तिसंदेहः संभावनाविरहविशिष्टस्यैव समानध
र्मिकनिश्चयस्य प्रतिबंधकत्वादिति भावः। नन्वेवं प्रसिद्धधूम एव व्याप्तिनिश्चयेऽप्येतन– मातिरि
क्तो धूमो न वेति संभावनयैव धूमाव्यभिचारित्वे न वेति संशयसंभवात्कृतं सामान्यलक्षणयेत्य
त आह विशेषतश्चेति तथा च विशेषतो घटत्वादिरूपेणोपस्थितानां प्रसिद्धभिन्नानां धूमत्वाभा

रो

१८

वच्छत्तयानिश्चयात्तदतिरिक्तस्य प्रसिद्धस्य मस्योपस्थितत्वमेव सामान्यलक्षणा व्याख्याता विनासंभाव
नायाएवासंभवादितिभावः। समानधर्मिकज्ञानस्य विरोधित्वे संभावने बनसंभवति कस्योत्तेजक
त्वस्यादित्याह एतदिति- तेषु विशेषदर्शनादिति। रूपेषु पार्थिवादिभिन्नत्वाभावदर्शनादित्यर्थः। अ
तिरिक्ते पार्थिवादिरूपातिरिक्तेः रूपान्यन्नरूपमिति। प्रात्यक्षिकस्यैव विशेषदर्शनस्याकारो
पंउद्दृश्यतावच्छेदकविधेययोरैक्येन तादृशशाब्दस्यासंभवादिति ध्येयं॥ सामान्यरूपेण ज्ञाने वि
शेषतोपि विशेषदर्शनमाह द्रव्यादयइति- आदिपदेन कर्मत्वादिप्रकारेण कर्मसामान्यादेः प
रिग्रहः। रसादयइति तत्राप्यादिपदाद्घटत्वादिप्रकारेण गंधस्पर्शादीनां संग्रहः- ननु संभावना
याविशेष्यतावच्छेदकं तदंतर्भावेण समानधर्मिकनिर्णयः संभावनाविरोधी रूपान्यन्नरूप
मित्याकारकनिर्णयस्तु न संभावनायां विशेष्यतावच्छेदकं यत्प्रसिद्धरूपभिन्नत्वं तदंतर्भावेण

१९

19

नःसंभावनास्यादेवेतिपदद्विरूपात्तयात्तदंतर्भावेणापिनिर्णयमाह प्रसिद्धेत्यादिः प्रसिद्धरूपभि
न्नसर्वेन्नरूपमितिनिर्णयसत्वे रूपं वायुवृत्ति न वेति पर्यवसितो रूपं वायुत्वाभाव व्यभिचारि न वेत्या
कारः संदेहो नोत्पद्यत इत्यत उक्तं रूपभिन्नमिति उद्भूतावच्छेदकविषयतयोरेकोनप्रसिद्धरूप
भिन्नेपदद्वयभिन्नेसर्वेनरूपमित्याकारस्य शाब्दविशेषदर्शनस्यासंभवादाहृद्रूपंरसादिवेनित्ये
नापि प्रसिद्धत्वादेः संभवात् प्रसिद्धरूपभिन्नेपदद्वयेरसादिगतत्वसर्वेनरूपमित्यर्थः ते न संभा
वनाधर्मितावच्छेदकांतर्भावेनामः पल्वकोटिकसंभावनायां रूपमेश्च निश्चयो न बाधकः भिन्नविष
यकत्वात् किंतु रूपत्वाभावनिश्चय एवेत्यभिधानेप्याह रूपत्वाभाववदिति तस्याइति प्रसिद्धरू
पातिरिक्ते रूपत्वसंभावनापाइत्यर्थः नन्वेतादृशसंभावनाविरहदशायां रूपं वायुत्वाभाव व्य
भिचारि न वेति संशयोऽप्रसिद्धएवेत्यत आह तदानीमिति तदानीं भावनाविरहदशायामप्रसि

१९

द्वरूपेवायुत्वाभावव्याप्तिनिर्णये तादृशानुमेवे विप्रतिपन्नं प्रत्याह अतिरिक्तेति - तद्धर्मिकतदभावनिश्च
याभावत्वेन हेतुत्वमपेक्ष्य संभावनाविरहविशिष्टतादृशनिश्चयाभावत्वेन हेतुतायां गौरवादित्यर्थः तत्रै
व निर्णीतव्याप्तिक एव आमिश्रमतमुपन्यस्य दूषयति यत्त्विति तां सामान्यलक्षणात्प्रतियोगीति ·
सामान्याभावप्रतियोगीत्यर्थः अभावबुद्धौ प्रतियोगिज्ञानस्य हेतुतासत्त्व एव सकलप्रतियोगि
ज्ञानापेक्षास्यात् सैव तु नास्तीत्याह नहीति ज्ञानमात्रे प्रत्यक्षमात्रे · प्रथमे नेवेति · तत्र सामान्यलक्ष
णावादिनः व्यभिचारात् प्रमेयत्वसामान्यलक्षणया प्रत्यक्षे व्यभिचारात् द्वितीये इदं त्वेति - नन्वभाव
त्वप्रकारकतल्लौकिकप्रत्यक्षे प्रतियोगिज्ञानं हेतुरत आह मानाभावादिति अत एव प्रतियोगिज्ञानं वि
नाप्यभावप्रत्यक्षादेव · तन्निर्दंभावोनवेति संज्ञाये विषयीभूतमिदं त्वेते जोऽभावत्वमेव तथा च त
त्रापि तेजोरूपप्रतियोगिज्ञानसत्त्वान्न व्यभिचार इत्यत आह तेजोऽभावत्वेति तदयोगादिति ·

२

20

भावत्वसंशयायोगादित्यर्थः । तद्धर्मविशिष्टधर्मिकतदभावग्रहं प्रति तादृशज्ञानेच्छाविरहविशिष्ट
धर्मिकतदभावग्रहं प्रति तादृशज्ञानेच्छाविरहविशिष्टज्ञानमात्रस्यत्वे च मनाहार्यधीप्रसंगादिति
भावः । अथ भावबुद्धौ प्रतियोगिज्ञानस्याहेतुत्वे विनापि घटादिग्रहं घटो नास्तीत्याकारकाभावप्र
त्यक्षापत्तिरत आह प्रतियोगीति । तथा चोक्तबुद्धेर्घटत्वविशिष्टवैशिष्ट्यबुद्धित्वात् तत्कारणीभू
तस्य घटत्वप्रकारकज्ञानस्य विरहादेव न तत्संभवादिति भावः । ननु स्वातन्त्र्येणाभावप्रत्यक्षे प्रति
योगिज्ञानस्याहेतुत्वेपि अभावप्रत्यक्षे सकलप्रतियोगिविषयतासिद्ध्यर्थं संनिकर्षविषये व तद
पेक्षास्यादत आह । सकलेति । तस्य सामान्याभावप्रत्यक्षस्य । अथ भावं लौकिकप्रत्यक्षे प्रतियोगिता
वच्छेदकविशिष्टप्रतियोगिज्ञानस्याहेतुत्वे घटनिर्विकल्पकोत्तरं विशेष्यविशेषणाभिन्यायेनाभावे घ
टं घटश्च घटत्वमवगाह्य घटाभाव इत्याकारकलौकिकप्रत्यक्षं स्यात् । न चेष्टापत्तिरननुभवादपसिद्धान्ता

२

च्च॰ घटत्वप्रकारेण घटविशिष्टबुद्धौ घटत्वप्रकारेण घटज्ञानस्य हेतुत्वोक्त्या कथंचित्तन्निरासेपि घटाज्ञा
नदशायामिन्द्रियसंबद्धविशेषणतयान्येत्याकारकस्य घटाभावलौकिकप्रत्यक्षस्य प्रसंगोऽनिर्वारः । अभावप्र
त्यक्षे प्रति विशिष्टप्रतियोगिज्ञानस्य हेतुत्वे तु मानुपस्थितस्य विशिष्टप्रतियोगिनोऽभावांशे विशेषणताभूप
भाने बाधकाभावात् अन्यतादृशप्रत्यक्षे न च घटाभावस्यैव घटत्वावच्छिन्नाभावत्वेन प्रात्यहिकभ्रमे घटज्ञानाजन्ये व्य
भिचारात् प्रतियोगिज्ञानस्य हेतुत्वं दुर्घटं घटत्वावच्छिन्नाभावत्वेन प्रत्यक्षं प्रत्येव घटज्ञानत्वेन हेतुत्वे तु घटाज्ञानद
शायां विशेषणताप्रत्यासत्त्यान्येत्याकारकप्रत्यक्षं दुर्वारमिति वाच्यं । घटत्वाद्यवच्छिन्नप्रकारताऽन्यप्रकारताऽनि
रूपिताभावनिष्ठलौकिकविषयताकप्रत्यक्षं प्रत्येव घटत्वादिप्रकारकज्ञानत्वेन हेतुत्वात्तस्य च प्रमाभ्रम
निर्विकल्पकसाधारणत्वात् । प्रकारत्वं तु प्रतियोगितासंबंधावच्छिन्नं ग्राह्यमतो घटो नास्तीति प्रत्यक्षस्य स्वरू
पसंबंधेनाभावत्वप्रकारकत्वेपि नासंग्रहः । यद्यपि विशिष्टप्रतियोगिज्ञानस्य हेतुत्वपक्षेप्यभावो न घटीयरत्यभा

वे प्रतियोगितासंबंधावछिन्नघटाभाववति अयदशायामिंद्रियसंबद्धविशेषणतावशान्नित्याकारकप्रत्यक्ष
स्यदुर्वारत्वं न चाभावत्वसामानाधिकरण्येन यदि घटाभावग्रहः तदा तस्याविरोधित्वादग्रे घटो नास्तीत्येव
धीर्जायते प्रतियोगिविशिष्टबुद्धेः सामग्रीसत्वात् अभावत्वावच्छेदेन घटाभावग्रहस्तु तदानीमसंभवी अभा
वत्वविशिष्टप्रतियोगितासंबंधेन घटविशिष्टबुद्धिमात्रस्यैव तदवच्छेदेन प्रतियोगितासंबंधावछिन्नघटा
भाववत्ताज्ञानविरोधित्वादिति चेन्न यथा घटनित्याकारप्रत्यक्षोत्पादनं दुर्घटमिति वाच्यं तदसंभवेप्यभाव
त्वावच्छेदेन प्रतियोगितासंबंधेन घटवद्वृत्तिधर्मवत्तानिर्णयदशायां विशेषणतासन्निकर्षान्नित्याका
रकप्रत्यक्षोत्पत्तेर्वज्रलेपत्वात् तद्वद्वृत्तिधर्मवत्ताज्ञानस्यापि तद्वत्ताज्ञानविरोधित्वनाभावांशे घटवत्ताज्ञाना
संभवात् तथाहि नित्याकारकप्रत्यक्षस्य घटत्वावच्छिन्नप्रकारत्वान्यप्रकारतानिरूपिताभावनिष्ठविषयता
कत्ववत्तत्पटत्वकुड्यत्वादितत्तद्धर्मावच्छिन्नप्रकारत्वान्यप्रकारतानिरूपिताभावनिष्ठविषयताकत्वेन ता ॥

दृश्यता दृश्यविषयताकं भावप्रत्यक्षत्वावच्छिन्नं प्रतिहेतुभूतस्य तत्तद्धर्मप्रकारकज्ञानकूटस्यैकदा विरहा
देवनेत्याकारप्रत्यक्षं। वस्तुतो घटत्वपटत्वादिप्रत्येकधर्मावच्छिन्नाभावत्वप्रकारकप्रत्यक्षे प्रत्येकं घटत्व
त्वादिप्रत्येकधर्मप्रकारकज्ञानत्वेन हेतुत्वं। तथा च तादृशप्रत्यक्षस्य सामग्रीविरहादेव केवलेन्द्रियस
न्निकर्षदशायामभावो न घटीयपटत्वादिबाधदशायां वा नाभावस्य प्रत्यक्षं विशेषसामग्रीविरहादित्यत
श्चाह प्रतियोगिज्ञानहेतुत्वेपीति। परन्तु। घटत्वावच्छिन्नप्रतियोगितासंबन्धेन घटत्वादिविशिष्टवैशि
ष्ट्यावगाह्यभावत्वावच्छिन्नधर्मिताकाभावलौकिकप्रत्यक्षत्वं प्रतियोगितासंबन्धेन घटत्वादिविशिष्ट
वैशिष्ट्यावगाहित्वं स्यादि लौकिकप्रत्यक्षत्वं इदं त्वादिप्रकारकाभावप्रत्यक्षत्वं च नानेनेन्द्रियसंबद्धवि
शेषणतया एवकार्यतावच्छेदकं वाच्यं ननु प्रतियोगिज्ञानस्य तावतैव नेत्याकारप्रत्यक्षस्य कारणसंभ
वात् नचैवं घटाभावो नास्तीत्यभावत्वप्रकारकं लौकिकप्रत्यक्षं न स्यात् तादृशाभावस्य द्रव्यतयेन्द्रियसं

वद्धविशेषणतायास्तद्ग्राहकत्वासंभवात् इंद्रियसंयोगादेर्द्रव्यसाक्षात्कारत्वाद्यवच्छिन्नं प्रतिवहेतुत्वादि
तिवाच्यं-द्रव्यप्रत्यक्षत्वादिरविषयाभावाभावत्वादिप्रकारकद्रव्यप्रत्यक्षत्वस्यापींद्रियसंयोगजन्यतावच्छेदा
कत्वोपगमात् वस्तुतो नव्यमतेऽभावाभावस्यातिरिक्तत्वात् विशेषणतेवतद्ग्राहिकेतिसांप्रदायिकैरुक्तं-ननु
चेत् तत्पुरुषीयघटत्वाद्यवच्छिन्नाभावत्वादिप्रकारकचाक्षुषत्वाद्यवच्छिन्नं प्रतितत्पुरुषीयचक्षुः संब
द्धविशेषणतात्वेनेंद्रियभेदेन पुरुषभेदेन चानंतहेतुत्वकल्पनामपेक्ष्य घटत्वाद्यवच्छिन्नाभावत्वप्रकारकप्र
त्यक्षत्वावच्छिन्नं प्रत्येव लाघवेन सामानाधिकरण्यप्रत्यासत्त्या घटत्वादिप्रकारकज्ञानत्वेन हेतुतायाः युक्तत्वात्-सं
योगसंयुक्तसमवायादिभेदेनेंद्रियसंबंधानामननुगमाच्च-यपि प्रसिद्धानामभावलौकिकप्रत्यक्षाणां
विशिष्टावगाहित्वनियमात्तत्तद्विशेषणतावच्छेदकप्रकारकज्ञानविरहादेव तेषां नापत्तिरतिरिक्तस्य
चेन्नेत्याकारप्रत्यक्षस्यालीकनयानापत्तिसंभावनापि पारमार्थिककार्यव्यक्तीनां सामग्र्या एव कार्योत्प

त्ति व्याप्यत्वोपगमात्तथा च घटत्वादिविशिष्टवैशिष्ट्यावगाहिभावप्रत्यक्षत्वादिना धर्मेणामिंद्रियसंबद्धवि
शेषणतापन्नप्रतियोगिज्ञानस्य वा कार्यतावच्छेदकत्वविरहेऽपि न क्षतिरिति तदसत् यत्र पटाभावे घटत्वा
वच्छिन्नप्रतियोगिताकत्वादिभ्रमस्य सामग्री नास्ति तत्रेंद्रियसंबद्धविशेषणतावर्लेज्ञायमानस्य पार
मार्थिकस्य घटो नास्तीति प्रत्यक्षस्य घटाभाववद्वपटाभावेपिस्तो किंकविषयतासंबंधेनोत्पत्तेर्दुर्वारत्वा
त् तस्य च पटाभावांशे विशिष्टबुद्धिसामग्रीविरहान्नेत्याकारकतायाश्चार्थवशसंपादनीयत्वादिति दिक्।
तदभावेति- तस्याभावप्रत्यक्षादित्यर्थः तादृशकारणतायां साधकाभावमुक्त्वा व्यभिचाररूपं बाधकमा
प्याह ध्वंसेत्यादिना घटध्वंसो हि घटत्वप्रागभावतदत्यंताभावानामभाववत्त्वे घटत्वप्रागभावाद्यो न सं
तीति प्रत्ययव्यवहाराच्च एवं घटप्रागभावोऽपि घटत्वध्वंसतदत्यंताभावानामभाववत्तया घटात्यंताभावोऽपि
घटत्वध्वंसतत्प्रागभावानामभाववत्तेषां चैकप्रतियोगिज्ञानमात्रादिवग्रहात् स्फुटतरो व्यभिचार इति भावः

२२

स्वमते ध्वंसप्रागभावयोरत्यन्ताभावेन समं न विरोधः ध्वंसस्य प्रागभावः प्रागभावस्य च ध्वंसोऽतिरिक्त ए
वेत्यनुक्तमभ्युपगमादिति ॥ प्राचीनैरुपगमादित्यर्थः इदमुपलक्षणं ॥ नव्यमते समनियतसंख्यापरिमाणाद्य
भावानामैक्यादेकमविज्ञायापरप्रतियोगिज्ञानादेवग्राह्यत्वाच्च तत्रैव स्वमतेऽपि व्यभिचारो द्रष्टव्यः ननु स्व
परप्रकाशकतेजःप्रतियोगिकयावत्संसर्गाभावरूपस्यांधकारस्य ग्रहो न तादृशयावत्तेजोग्रहं विना प्र
तियोगिबुद्धेरभावप्रत्यक्षहेतुत्वात् ॥ यावत्तादृशतेजोग्रहश्च न सामान्यलक्षणां विना संभवतीति प्राचां
मतं दूषयति अंधकारस्त्विति ॥ तेजोविशेषेति ॥ महाप्रभात्वावच्छिन्नाभाव इत्यर्थः उद्भूतानभिभूतरूपव
न्महातेजःसामान्याभावस्तु नार्थः अनुद्भूतत्वाभावाद्यात्मकस्योद्भूतत्वादेरतींद्रियतया तद्घटितधर्मावच्छि
न्नाभावस्यायोग्यत्वेन प्रत्यक्षायोगात् ॥ नीलत्वशुक्लत्वादिव्यापकमुद्भूतत्वमेव सामान्यं चाक्षुषप्रयोजकं
पि शाचनिरासयोर्भादोन नीलशुक्लाद्यात्मकं रूपं किंतु तद्भिन्नमेव प्रत्यक्षस्य चाक्षुषाद्यन्यतमत्वनियम

23

२३

मस्वरूपस्य नीलशुक्लाद्यन्यतमत्वनियमेनाभावादित्यस्य द्रुरूत्वर्णानां मतानुसारेण तत्प्रकारे पि स
म्यगिति ध्येयं न चालोकसन्निधाने पि घटीयत्वमेतमइति चाक्षुषापत्तिः चक्षुः संयुक्तसमवेतरूपविशे
षतायाः तादृशप्रभाधर्मविषिस्त्वादिति वाच्यं॥ तमः सालोकात्वं प्रति चक्षुः संयुक्तविशेषणताया एव हेतु
त्वोपगमादिति भावः। एकत्रेति। एकदेशीयतेजोध्वंसप्रागभावव्यक्तीनामन्यदेशेविरहादिति भावः।
ननु यावत्त्वप्रतियोगिविशेषणेन तथा च यावत्त्वं तितादृशतेजोसितद्यक्तित्वेतरधर्मानवच्छिन्नतत्तद्य
क्तिनिष्ठप्रतियोगिताकाभावानामेकदेशवृत्तीनामेव तमस्त्ववाच्यमत आह अनुगमादिति। निरुक्ताभा
वानामननुगतेन कधर्माभावात्तमइत्यनुगताकारप्रतीतिर्नस्यादिति भावः। ननु यावत्तितादृशतेजोसितेषां
तथाविधैकप्रतियोगिकाभावविशिष्टेनापरप्रतियोगिकाभावेन विशिष्टमन्यप्रतियोगिकाभवमादा
यतेनापि विशिष्टमपरापरप्रतियोगिकाभावत्वमेवानुगमकं वाच्यमत आह गौरवादिति अनंतानां

मभावानां तमःप्रतीतिविषयत्वं कल्प्यनामधेयस्य तेजोविशेषसामान्याभावस्यैव तादृशप्रतीतिविषयतायां
लाघवादिति भावः। ननु तेजोविशेषसामान्याभावस्य सन्निकर्षदशायां तत्तत्तेजोऽभावस्यापि सन्निकृष्टत-
यातेषामपि तमःप्रतीतिविषयताप्तौ व्याप्तुतो गौरवमत आह तेजोविशेषेति। तेजोविशेषत्वादिज्ञानविरहे
तेजोविशेषाणां तत्तदभावप्रत्यक्षानभ्युपगमादिति जनात तथा च विशिष्टप्रतियोग्यनुपस्थितौ तेजस्त्वादिसामान्य
रूपेणोपस्थितिकालेऽपि नाभावसमुदायस्य प्रत्यक्षं संभवतीति व्यर्थं तमस्त्वासत्वेति भावः। तेजःसामग्रीति। तथा
च प्रागभावस्य प्रतियोगिसामग्रीवत्त्वात्तेजःसामग्रीविरहदशायामंधकारप्रतीतिनैयत्यादिति भावः। न
नु भाविप्रतियोगिकप्रागभावप्रत्यक्षस्य तादृशप्रतियोगिव्यक्तिज्ञानं विनानुत्पादात्तदर्थं सामान्यलक्ष
णावश्यकीत्यत आह प्रागभावेति। तथा च घटप्रागभाव इति प्रत्यक्षस्य विशिष्टवैशिष्ट्यबोधनया घटत्व
प्रकारकज्ञानमात्रं तत्र हेतुर्न तु प्रतियोगिव्यक्तीनां तत्र प्रवेश इति भावः। ननु घटादिप्रतियोगिविशिष्टप्रा

गभावप्रत्यक्षे घटादेर्भानार्थमवश्यं तस्य संनिकर्षो वाच्यः स च लौकिकप्रत्यासत्तिबाधाद् गत्यैव ज्ञा
नलक्षणासंपादकत्वेन सामान्यलक्षणापि पर्यवस्येदित्याशंकते अत्र चेति- इति प्रत्यक्षमित्याकारशब्दप्र
योज्ये कप्रत्यक्षे घटीयप्रागभावो वर्त्तमान इत्याकारप्रत्यक्षमिति यावत्- यथाश्रुते घटस्य विशेष्यतये
वभानात् प्रतियोगिविशेषितमित्यस्यासंगत्यापत्तेः। भ्रमत्वमिति- प्रसज्येतेति शेषः प्रतियोगितासंबं
धेन तत्तद्ध्वंसाभाववति घटत्वादिप्रकारेणापि तादृशसंबंधेन तत्तद्ध्वंसावगाहिनो ज्ञानस्य भ्रमत्वाभ्युपगमा
मादिति भावः। स्मृतमिति यद्यपि घटत्वप्रकारकानुभवस्यैव प्रत्यासत्तित्वात्तदुत्तरं घटो भविष्यतीति प्र
त्यक्षमेव भाविघटविषयीकर्तुमर्हतीति तथाप्युक्तप्रत्यक्षे प्रागभावांशे भाविघटस्य विशेषणतया
भानस्य ज्ञानं पूर्वमपेक्षितमित्याशयेन स्मृतमित्युक्तं- तत्रापि स्मृतत्वं न विवक्षितं किंतु ज्ञानमात्रं तेन
घटत्वसामान्यलक्षणाजन्यानुभवादपि घटविशेषितप्रागभावप्रत्यक्षस्य कचित्संभवान्नक्षनत्वासा

मान्यलक्षणाप्रत्यासत्तेः स्वाश्रयमुख्यविशेष्यकप्रत्यक्षं प्रत्येव जनकत्वात्· तादृशप्रत्यासत्तेः प्रागभावबि
शेषणत्वेन घटस्य प्रत्यक्षं न संभवत्यत उक्तं स्मृतमित्यप्याहुः ।। तं भाविघटेन तत्र घटो भविष्यतीति प्रत्यक्षं
त व्याख्यः· प्रतियोगिविशेषितमित्यस्य प्रतियोगिविशेष्यकमित्यर्थः· तच्च प्रत्यक्षविशेषणं तेन घटो वर्त्तमान
प्रागभावप्रतियोगीत्याकारस्यैव प्रत्यक्षस्य लाभः· घटत्वेनानुभूतं स्मृतं चेत्यत्र चकारोऽपि वार्थः· तेन कचित्सा
मान्यप्रत्यासत्त्या घटत्वेनानुभूतं क्वचिच्च तादृशानुभवबलाद्धटत्वेन स्मृतमेव भाविघटं घटो भविष्यती
ति मानसप्रत्यक्षं घामान्यप्रत्यासत्तिबलादालंबत इत्यर्थः· तेन घटीयो वर्त्तमानप्रागभाव इति प्रत्यक्ष
स्य भाविघटप्रागभाव एवएव घटत्वप्रकारेण प्रतियोगितया घटांतरावगाहित्वेऽपि न भ्रमत्वं प्रतियो
गितासंबंधेन घटत्वावच्छिन्नाभाववत्त्ववत्तादृशसंबंधेन घटत्वावच्छिन्नप्रकारताकज्ञानस्य तादृश
संबंधेन घटत्वावच्छिन्नस्य भ्रमत्वादित्यस्फुटावपि तत्त्वातिरिति प्राहुः ।। नन्वेतिति द्वितीयपक्षाच्यमित्यनेना

न्वय। कारणान्तरप्रवेशे गौरवादाह चरमकारणेति। प्रतियोगिन इत्यादि। अन्यदा चरमकारणासत्त्वदशा
यां तस्याः सामग्र्याः तथात्वे प्रागभावव्यंजकत्वे। अतिप्रसंगादिति सामग्र्यां प्रागभावव्यभिचारग्रहदशा
यामपि तत्त्वात्पत्तप्रसंगादित्यर्थः तथात्वे प्रागभावव्यंजकत्वं तद्धेतुका सामग्रीहेतुका। नच सामग्र्याः
प्रागभावव्याप्यत्वग्रहेपि पक्षधर्मतानिश्चयाभावात्कथमनुमितिरिति वाच्यं घटप्रागभावव्याप्यघट
सामग्र्याः कपालवृत्तित्वसंदेहेपि तत्प्रागभावपक्षत्वस्यानुत्पादोदनुरोधेनापि पक्षधर्मतानिश्चयपत्वस्या
वश्यं वाच्यत्वादिति भावः। अनुमितिरेवेति तथा च तस्याः पूर्वप्रतीतस्यापि घटादेः पक्षधर्मतावत्त्वादेव भान
मविरुद्धं अनुमित्यापकतावच्छेदकप्रकारेण ज्ञानस्यैव तांत्रत्वादिति भावः। ननु कापालादौ प्रागभावव्या-
प्यसामग्र्याः परामर्शेपि घटप्रागभावस्य नानुमितिः समानविषये लौकिकप्रत्यक्षसामग्र्या बलवत्त्वाद
त आह तावत्कालमिति। सामग्र्यां प्रागभावव्याप्त्यादिग्रहकालपर्यन्तमित्यर्थः। असत्त्वेनेति नचयत्रैव

२६

26

चरमकारणोत्पत्तिक्षणोत्तत्पूर्वक्षणे वा प्रागभावव्याप्यतया चरमसामग्र्याः परामर्शस्तत्रोत्तरकालं प्रागभा
वप्रत्यक्षे वाधकाभावः पूर्वं प्रागभावात्मकविषयस्यासत्त्वादिति वाच्यं प्रागभावव्याप्यचरमकारणवत्तापः
स्यत्वादिसाधारणनिर्णयमात्रस्यातिप्रसक्तत्वात् तत्तल्लौकिकनिर्णयस्यैव हेतुतया पूर्वं तदसंभवादिति भा
वः। तद्बुद्धेरेवेत्येवकारेण व्याप्यत्वादिधीव्युदासः। तथा च कार्योपधायकत्वेन चरमकारणवत्तालौकि
कप्रत्यक्षमेव प्रागभावस्य व्यंजकमतः स्वरूपतस्तद्धेतुभवे कार्योपधायकतया तत्स्मारणे वा न प्रागभा
वप्रत्यक्षं तदभिप्रेत्यैवोक्तं कार्योत्पादो दृष्ट इति। केचित्तु यादृशस्य प्रागभावप्रत्यक्षे कारणकलाप
स्यानंतरं कार्यीभूतस्य प्रागभावप्रत्यक्षस्योत्पादो दृष्टः प्रमाणसिद्धः तद्बुद्धेरेव तादृशकारणकलापोत्तरग
गद्धिव्यक्तेरेव प्रागभावव्यंजकत्वोपगमादित्यर्थः। तथा च प्रागभावव्याप्यत्वाद्यविषयकस्यापि चरमकारण
विषयकत्वान्नस्यैव विशिष्टप्रागभावं व्याप्यचरमसामग्रीमत्त्वज्ञानमेव प्रागभावग्रहे हेतुः परामर्श
प्रत्यक्षहेतुत्वोपगमान्न तस्याप्यनुमितित्वमिति भावः तेन स्वरूपतो ज्ञानादिकमादाय नातिप्रसंगलेशोऽपीत्याहुः। ननु प्रागभाव १

२६

स्यानुमितिहेतुतापाः कृप्तत्वात् न तु कार्येपि व्यापकतया सामग्रीमत्वज्ञानं तथाकारणांतरकल्पनागौर
वात्· एवं चात्र समानविषये प्रत्यक्षसामग्र्या बलवत्वेप्यत्र तदकल्पनात् प्रागभावस्यानुमितिरेव नाय
तामतः प्रत्यक्षासत्वेऽनुमानमपि प्रागभावस्य दुर्घटमित्याह अनुयोगिति अनुयोगित्वं घटादिनिष्ठप्रतियो
गितानिरूपितस्वरूपसंबंधविशेषः आदिपदाद्ध्वंसोपाधिरूपस्य प्रागभावत्वस्य परिग्रहः प्रागभाव
त्वादेरित्यादिपदात्तदीयव्याप्याद्युपग्रहः ताद्रूप्येण प्रागभावत्वरूपेण असंभवादिति· तथाचानाय
सैव तत्प्रत्यक्षमास्थेयमिति भावः· घटो भविष्यतीति शब्दाभिलप्यमानोऽर्थ एव यदि भविष्यत्वेनदा तस्या
तीन्द्रियत्वेन प्रत्यक्षमेव नास्ति कुतस्तत्र प्रतियोगिविषयितापार्यन्तापि सामान्यलक्षणांगीकार्येत्याश
येनाह भविष्यत्वं हीति· भविष्यतीति पदाभिलप्यमानं हीत्यर्थः वितर्कितस्यापश्चाद्दृष्टनष्टादाव
पि भविष्यतीति प्रयोगापत्तेरुक्तं वर्त्तमानेति· प्रागभावविशेषणं· तच्च तत्तत्कालीनत्वं श्वोभाविनीति·

२७

21

श्वो भाविघटीयप्रागभावस्याद्यापि वर्त्तमानत्वात्. नचाद्यादिकालस्य प्रतियोगित्वेनान्वयः तथा सत्यद्यभा
विनि परश्वोभविष्यतीति प्रसंगात् अद्यभाविनः परश्वोपि वृत्तेः नापि प्रागभावप्रतियोगिनि चोभयत्र
कालादेरन्वयस्तेनैवमिति युक्तं श्वा घट्टणा घटो भविष्यतीतिति प्रयोगानुपपत्तेः घटत्वस्याभावयोरेक ग
दणावृत्तित्वादिति भावः। उत्पत्तिरूपं भविष्यत्वघटिकेत्यत्र हेतुः समानार्थकत्वादितिचेत्तां स्वयंप्राग
भावास्वीकारादिदं वर्त्तमानकालेति. अत्रोत्पत्तिरपि ध्वंसघटितायास्तथा. इदंनिरुक्तं भविष्यत्वं अतीन्द्रि
यत्वादिति. तथाचानुमानादिनैव तद्ग्राह्यं नवाच्यमितस्त्वनागतभानार्थं नसामान्यप्रत्यासत्त्यादरः। यद्यपि
भविष्यत्वस्यातीन्द्रियत्वेपि भाविघटविशेषिततद्दलौकिकप्रत्यक्षानुरोधेनैव सामान्यप्रत्यासत्तिरावश्यक
कीतस्य प्राचीनघटावगाहित्वेनुमत्यापत्तेस्तथापि वर्त्तमानक्रमेणाशब्दादनुमानाद्वा घटत्वादिप्रका
रेण भाविनो घटादेर्ज्ञानोत्पत्त्या विनापि सामान्यलक्षणां भाविघटादेर्भविष्यत्वमाने भविष्यतीति सिद्धं २७

तनिगर्वः। ननूक्तापि भविष्यत्वे कालादेस्तद्घटकप्रागभावान्वयित्वे पूर्वोक्तातिप्रसंगतादवस्थ्यमत आह
इहेतीत्यादौ प्रयोगे तादृशोऽसत्त्वेः विद्यमानप्रागभावप्रतियोग्युत्पत्तेः देशविशेषः कपालादिः काल
विशेषोऽर्धस्यादिः अधिकरणत्वेनेति प्राचां मते तेषां भेदार्थकविभक्तिसमवधानस्थले नामार्थधा
त्वर्थयोरपि भेदेनान्वयस्योपगमात् अधिकरणताविशेषणत्वेनेति वार्थः तथाहाद्य घटो भविष्यतीत्या
दौ वर्त्तमानप्रागभावप्रतियोगिनी याएतत्कपालवृत्तिरद्यादिकालवृत्तिरुत्पत्तिस्तदाश्रयो घट इत्याका
रः शाब्दबोधः उत्पत्तिमत्तो वेति। अधिकरणत्वेन प्रतीयत इत्यनुषंजनीयं कालस्य प्रागभावान्वये ध्वंसाभा
वियघभविष्यतीतिप्रयोगप्रसंगस्य पूर्वमुक्तत्वाद्देशस्य प्रागभावान्वये दोषमाह अत एवेति यतो न प्रा
गभावे देशकालयोरन्वयः अत एवेत्यर्थः घटादौ त्वादिनाऽतत्प्रागभावसंग्रहः तत्रापि घटध्वंसप्रागभाव
स्य प्राच्यैः स्वीकारात् तत्प्रागभावेति। घटनाशप्रागभावे इत्यर्थः तत्र न शनाश्य घटके कपालो नेत्यस्य तु

२८

द्धिरित्यनेन संबंधः नच घटध्वंसस्य प्रागभावो न घटादिः किंत्वतिरिक्त एव स च तादृशकपालेनास्ती
ति नोक्तदोष इति वाच्यं प्राचां मते नोक्तत्वात् नव्यमते विंदिशविशेषस्योत्पत्ति विशेषणतयैवान्व
यस्यानुभविकत्वादिति भावः उत्पत्तिमति देशकालयोरपि कारणत्वेनान्वये दोषमाहुर्नवेति न चोत्प
त्तिमति प्रागभावे चोभयत्रैव देशकालयोरन्वयो वक्तव्य इति भेत्र प्रागभावस्य परश्वः प्रागणयोरस
त्वान्न दोष इति वाच्यं आघटत्वरोपघटो भविष्यतीति प्रयोगानुपपत्तेः घटतत्प्रागभावयोरेकत्वेना
वृत्तित्वादित्युक्तत्वादिति भावः परश्वः प्रांगणे गच्छति गते वा मैत्रे तदीयो संनेविद्यमान प्रागभा
वप्रतियोगित्वमेवासंभवीत्यत उक्तं गमिष्यतीति नतु भूधानुसारि प्रत्ययाभ्युमुत्पत्तिद्वयोपस्थापना
द्घटो भविष्यतीत्यादौ विद्यमानप्रागभावप्रतियोग्युत्पत्तिकोत्पत्तिमानित्यन्वयेवाधेनुभवविरोध इत्य
त आह अत्रचेति गगनं द्रव्यं भवतीत्यादौ द्रव्याद्यात्मकविशेषणासंबंधस्यानुभवात् द्रव्यादितादात्म्यमे

28

२८

वभुवः शक्यं समभिव्याहृतेतद्व्यादिपदस्य तत्तदर्थे तात्पर्यग्राहकत्वात् तादात्म्यमात्रस्य भूशक्यत्वे
नामार्थस्य द्रव्यादेः र्धात्वर्थस्यापि तत्र भेदान्वयानुपपत्तेः अस्तु वाऽस्तित्वलक्षणास्वरूपसत्त्वं भुवः
शक्यं न तूत्पत्तिर्गौरवादित्याशयेनोच्यते इत्यपहायेत्याप्यत इत्येवोक्तं प्रतीतिस्तु लक्षणयापि संभ
वतीति भावः । तादृशेति । विद्यमानप्रागभावप्रतियोगित्वमित्यर्थः स्वप्रागभावास्वीकारादाह तादृ
शेति । वर्त्तमानकालोत्तरकालीनत्वमित्यर्थः प्रत्याप्यत इत्यनुषज्यते आंचस्तु । भूसत्तायामित्यादि शाब्दि
कस्येतेरिहाघघटो भविष्यतीत्यादौ धातोः कालसंबंधरूपस्वरूपसत्तामत्रमर्थः तदुत्तरप्रत्ययस्य
वर्त्तमानप्रागभावप्रतियोगित्वं कालादिबोधकाद्याद्वियपदस्य समम्पास्तूत्पत्तिरर्थः शरदि पुष्प्यति
सप्तच्छदाइत्यादौ समप्यास्तदर्थकत्वस्य नुत्पादतादेवं च एते इशौत्पत्तिके तत्कालोत्पत्तिकाचयावि
द्यमानप्रागभावप्रतियोगिनी स्वरूपसत्ता तदा अपो घट इत्यन्वयाकार इत्याहुः ॥ स्तुतरिहाघघेरो

२९

29

भविष्यतीत्यादावन्वयबोधस्य सकृदेवोत्पत्तिविषयकत्वानुभवात्स्वरूपसज्ज्ञानमवाच्छेदोऽधितिकृतोपे
क्षितमिति स्मर्त्तव्यं। ननु वर्त्तमानप्रागभावप्रतियोगितामात्रस्यैव प्रत्ययार्थत्वे स्यसंहितत्पादेर्भवि
ष्यत्तायामनुशासनविरोधः स्यादतो नशादिधातूत्तरस्यैव स्यतिप्रभृतेर्भविष्यत्ताबोधकत्वमुपपा
दयति नेत्यतीति ननु धातूत्तरप्रत्ययस्योत्पत्त्यर्थकत्वं न कुत्रापि दृष्टचरमतः सदृष्टान्तमाह नश्यति न
ष्ट इत्यादौ चेति। आख्यातनकृद्भेदेन दृष्टान्तद्वयोपन्यासः यथायथं यथाक्रमं उत्पत्तिरिति। प्रत्ययान्तर
त्यनुषज्यते अत्र च वर्त्तमानत्वादौ लक्षणशक्तिकानां प्रत्ययानामुत्पत्तौ लक्षणाशक्त्योरुभयोस्तु परस्प
रमन्वयाद्विशिष्टलाभ इत्यवधातव्यं। यद्यपि कारकविभक्त्यर्थस्य धात्वर्थान्वयित्वपित्वानुरोधेन धातु
नैवोत्पत्तिर्नाशश्च प्रत्याय्यताद् इत्येवं वक्तुमुचितं तथापि प्रत्ययं विना कृता केवलेन नशधातोरुत्पत्तिविशि
ष्टनाशस्याप्रतीतेः प्रत्ययसत्त्वे च प्रतीतेरन्वयव्यतिरेकाभ्यां प्रत्ययस्यैवोत्पत्तिरर्थः स्वभावो वेति ध्यात्व

२९

प्रत्ययार्थेनापि क्वचित्कारकस्य सम्पर्थस्यान्वयदर्शनादाशयः एवं नश्यतीत्यस्य वर्त्तमानप्रागभावप्रतियोग्यु-
त्पत्तिकोऽयो नाशस्तत्प्रतियोगितावानित्यर्थः नश्यतीत्यस्य वर्त्तमानोत्पत्तिकोऽपि नाशस्तत्प्रतियोगि-
तावानित्यर्थः नष्ट इत्यादौ च वर्त्तमानध्वंसप्रतियोग्युत्पत्तिकोऽपि नाशस्तत्प्रतियोगितावानित्यर्थ इति
चेन्न। नश्यामेवेति प्रत्ययोपस्थाप्योत्पत्ताविव न तु प्रकृत्यर्थनाश इत्यर्थः। न तु भविष्यत्वादेः प्रत्ययनिष्ठमते
स्तु शासनं तत्र विद्यमानप्रागभावप्रतियोगित्वादिपरमेवास्तु भविष्यत्वादिपदं आख्यातस्योत्पत्त्यर्थक-
त्वं च यथमतन्नाह एते नेति एते न उत्पत्ताविव कालविशेषादेर्वर्तमानत्वादेश्चान्वयेन इदं च परास्तमित्यन्व-
यि। नंक्ष्यतीति व्यवहारः नष्टे चेत्यनुपपत्तेरित्यादिरिति व्यवहार इत्यनुपपत्ते आदिपदेन नष्टवानित्या-
दिसंग्रहः। क्तप्रत्ययार्थानीतत्वस्य नाशेऽसंभवादिति भावः तत्र नष्ट इत्यादौ। अतीतेति। तथा च नाशस्य
विद्यमानत्वेपि अतीतकालसंबन्धित्वान्नष्ट इत्यादिव्यवहारो नानुपपन्न इति भावः लाघवादाह वर्त्तमा

३०

नत्वं वेति । प्रथमे चिरविनष्टेपि पूर्वेद्युर्नष्ट इति स्यात् । चिरोत्पन्ननाशव्यक्तेरतीतकालसंबन्धित्वपूर्वेदिनवृत्ति
त्वयोः सत्त्वात् । द्वितीये तु चिरविनष्टेप्यद्य नष्ट इति स्यात् तादृशनाशस्य वर्त्तमानत्वादद्यनाससत्त्वाच्चेत्याह ।
विनष्टेपीत्यादिना । ननु घटो भविष्यति नंक्ष्यतीत्यादौ धात्वर्थोत्पत्तिनाशादेः कथं घटादावन्वयः । धात्वर्थनामा
र्थयोर्भेदेनान्वयस्याव्युत्पन्नत्वादत आह कर्त्तरीति । भविष्यतीत्यादावाश्रयत्वरूपं नंक्ष्यतीत्यादौ च प्रतियो
गित्वरूपं कर्त्तृत्वमाख्यातेन प्रत्याय्यते भविष्यन्नित्यत्राश्रयरूपो नष्ट इत्यत्र च प्रतियोगिरूपः कर्त्ता कृता क
थ्यते तथा च प्रकृते धात्वर्थनामार्थयोर्भेदेनाभिधानाद्घटादिपदोत्तरमभिहिताधिकारीयतृतीयापत्तिरित्याशंका
शुद्रासाय कर्त्तृत्वं कर्त्ता चेति द्वयोरेव प्रत्यासः । तेन मुख्यमाख्यातकर्त्तृत्वमात्राभिधानस्थलएव तृतीयेति भावः
॥ ननु घटानुत्पाददशायामिह कपाले घटो नास्तीति प्रतियोगिविशेषितप्रागभावप्रत्यक्षानुरोधादेव सामा
न्यलक्षणा वाच्येत्यत आह कार्यानुत्पादेतिः समायाव्युच्छेदेनेति कालिकाव्याप्तित्वलक्षणायं संघनास्ती ।

३०

त्काराप्रत्ययः तादृशेति· घटो नास्तीत्याकारेत्यर्थः घटान्तरप्रतियोगिकध्वंसप्रागभावयोस्तत्र सत्त्वादिति·
भावः। यद्यपि घटप्रतियोगिकाभावमात्रावगाहित्वे ऽपि न सामान्यलक्षणासिद्धिः· पूर्वावगतघटव्यक्ती
नाज्ञानादेव तादृशबुद्धिसंभवान् तथापि वस्तुगतिमनुरुध्येदं। प्रतियोगिताकमिति· अभावमवगाहत
इत्युभयमनुषंजनीयं· तथेति· घटत्वावच्छिन्नप्रतियोगिताकावित्यर्थः। ध्वंसप्रागभावयोः सामान्याभा
वत्वस्वीकारे ऽपि तत्र कपाले न तत्संभव इत्याह· संभवतो वेति· इदमपि वस्तुगतिमनुरुध्य अन्यथा घटत्वाव
च्छिन्नध्वंसादेः सत्त्वे ऽपि तस्य तत्रस्य घटत्वेन यत्किंचिद्व्यक्तिज्ञानादेव संभवेन तदनुरोधात् सामान्यप्रत्या
सत्तेरसिद्धेरिति ध्येयं॥ ततः पूर्वमिति· घटो नास्तीति प्रतीतेः पूर्वं· तत्र कपाले न चेत्यनुषज्यते न च भा
विनष्टयोरुत्पत्तेताभावस्येव ध्वंसादेरपि सामान्यावच्छिन्नप्रतियोगिताकत्वे बाधकाभावः। कस्यचिद्दृष्ट
स्यानाशदशायामेव भाविघटो नष्टः कस्यचिद्दृष्टस्योत्पत्तिदशायामेव नष्टघटो भविष्यतीति प्रत्ययाप

३१

31

नैरेव बाधकत्वादिति भावः। ननु परात्यंताभावस्य परध्वंसाद्यविरोधित्वे परध्वंसात्यंताभावस्वरूपस्य च
परात्यंताभावस्य पटध्वंसदशायामपि तत्तौस त्वात्तदानीमपि तत्र पटध्वंसो नास्तीति प्रतीतिः स्यादन्य
थातदानीं तत्रोपरो नास्तीत्यपि प्रतीतिर्न स्यादित्यकामेनापि ध्वंसात्यंताभावयोर्विरोधो वाच्यस्तथा च
येनाशंकितेऽत्र पेषमिति। एवं पटस्य समवायिन्यपि तदत्यंताभावसत्त्वे कपालादाविति सावधारणं न
थाच तत्तावपि पटध्वंसदशायां तादृशबुद्धिः स्यादिति भावः। अत्रैव हेतुरत्यंताभावस्येत्यादि तन्मत
स्यादिः। तत्राद् इति। कपालाद्यात्मके त्वर्थः स्वरूपाणामननुगमादभावत्वप्रतीतेर्भ्रमत्वापत्तेरित्यतस्तत्स्व
रूपाणामतथात्वे पटस्य समवायिन्यपि तद्दशायां तत्र पटध्वंसस्य तदत्यंताभावप्रतीत्यापत्तेः अहस्रातिरिक्तेति।
स्य च पटस्य दशायां तत्ताव प्यस्तीति भावः। नन्विदानीं घटप्रागभाव इति प्रत्यये भाविनो घटस्याभानार्थमे
ति कर्षसंपादकतया सामान्यप्रत्यासत्तिरेव श्यकी स्यात श्राहइहेति। तत्सो कानामिति। तथा च किमनुरो

एम

३१

धात्वासामान्यलक्षणांगीकारेति भावः। एवमिति। भविष्यतिनास्तीत्यादिप्रत्ययानामसविषयकत्वे प्रागभावत्वे
न घटतीति भ्यानुपगमे इत्यर्थः। प्रागभावध्वंसस्याप्यसत्त्वे तद्घटितस्य पूर्वत्वादेः पश्चान्निर्वचनमसंगतं स्याद
तो ध्वंसे प्रमाणोपन्यासपूर्वकं प्रागभावमप्याकरोतीति जात इत्यादिना। उत्पन्नो घटध्वंस इत्याकारकबुद्धेरु
त्पत्तेः शेउपनीतमानतया न वस्तुमवस्थापकत्वमिति पदिभूयात्रापधादेरप्युत्पत्तिर्नस्यात् उत्प
त्यादित्येवदयितुं जातो घट इत्यादिवदित्युक्तं इति शिक्षनामिति। उत्पन्नाभावादित्यादिः। न त्विति।
प्रागभावशब्दोपि प्राक्कालवृत्त्यभावबोधकतया वाक्यमेव न तु पदमिति भावः। ननु प्रागभावकाल
वृत्तित्वरूपं सामान्यतः पूर्वत्वं तत्प्रागभावकालवृत्तित्वरूपं च तत्पूर्वत्वं विना प्रागभावं दुर्वचम
त आह। पूर्वत्वेति। तत्पूर्वत्वादीत्यादिपदेन तदव्यवहितपूर्वत्वसंग्रहः। तच्च तदुत्पत्तिक्षणोत्प
त्तिकध्वंसप्रतियोगिकालवृत्तित्वं। सामान्यतः पूर्वत्वमतीतकालवृत्तित्वं तच्च ध्वंसप्रतियोगिका

३२

स्ववृत्तित्वं महाप्रलयवारणाय प्रतियोग्यंतस्यावश्यकत्वादिति। भावः। तदुत्पत्तीत्यादि स्वस्यापि स्व-
द्वितीयक्षणादिवृत्तिध्वंसप्रतियोगिनि प्रथमादिक्षणावृत्तेः सर्वस्यैव स्वपूर्वत्वापत्तेरत उक्तं उत्पत्ती-
ति। अत्र च उत्पत्तिस्तदधिकरणसमयध्वंसानधिकरणसमयमात्रं न तु तत्संबंधोपि निवेश्यो वैय-
र्थ्यात् स्वोत्पत्तिकालीनात्यंताभावप्रतियोगि स्ववृत्तिद्वितीयक्षणादिवृत्तित्वमपि सर्वस्यास्तीति पूर्वदोषता-
तादवस्थ्यमतो ध्वंसेत्युक्तं। नष्टघटादिगोचरज्ञानादिव्यक्तीनां स्वोत्पत्तिक्षणवृत्तिध्वंसप्रतियो-
गिनि घटादौ विषयतया वर्त्तमानत्वेन स्वपूर्वत्वापत्तिरतः कालेति कालिकसंबंधेन वृत्तिप्रापकं
ननु दुःखप्रागभावस्योत्तरकालानुवृत्तिमुद्दिश्य प्रायश्चित्तादौ प्रवृत्त्यन्यथानुपपत्त्यैव प्रागभावः से-
ध्यतीत्यत आह दुःखात्यंताभावस्येति। अत्यंताभावस्य स्वत एवोत्तरकालानुवृत्तेः संभवत्प्रायश्चि-
त्तमनुपयुक्तं स्यादत उक्तं स्वस्मिन्निति। ननूत्तरकालसंबंधात्मिकायां तदनुवृत्तौ प्रायश्चित्तं न हे-

एम
३२

32

गुः तस्याः स्वसकारणाधीनत्वात् । दुःखात्यन्ताभावस्य नित्यत्वान्नात्र प्रायश्चित्तस्य हेतुत्वं संभवतीत्य
त आह दुःखसाधनेति । तथा च दुःखसाधनीभूतपापनाशं प्रत्येव प्रायश्चित्तं हेतुः तस्य च दुःखा
भावं प्रति तत्साधनात्यन्तापि द्विष्टाभावत्वेनेष्टत्वमिति स्वयमेव वोद्धाधिकारिपरंपराव्यवस्था
पितमिति भावः । नन्विति निष्प्रवृत्तेः प्रयोजनज्ञानाधीनत्वात्तदन्यथानुपपत्त्या प्रयोजनकल्पने ऽ
न्योन्याश्रयप्रसंगादिति भावः । ननु प्रागभावासत्वे जाते तस्यापि घटस्य द्वितीयक्षणे पुनरुत्पादप्र
संगः कपालसंयोगाद्यात्मकसामग्र्यास्तदानीमपि सत्वात् । न चाद्यघटस्य पुनरुत्पादस्याप्रसिद्धिः
एकघटद्वितीयक्षणोत्पद्येत घटसामग्रीक्षणाः स्यादेत घटोत्पत्तिप्राक्क्षणाः स्यादित्यापादनसंभवा
त् । न चात्र सामग्रीपदेन दण्डचक्रादिमात्राभिधाने ऽपि स्वघटद्वितीयक्षणे तद्घटोपगमात् विपर्य
यापर्यवसायित्वं प्रागभावादिघटितकारणकूटस्याभिधाने चापादकाप्रसिद्धिरिति वाच्यं । स्वकार

३३

33

णीभूतदंडचक्रादिविशिष्टोयंघटोपरिदंडचक्राद्यतिरिक्तकारणकोनस्यात् जन्यत्वेसतितद्वृत्तित्वक
रैत्यत्वभाववान्नस्यात् दंडचक्रादिजन्यस्यतत्त्वेजननेनियमादित्यस्यविवक्षितत्वात् - वस्तुतो
घटोत्पत्तिलक्षणयादितद्वृत्तजनकतावच्छेदकधर्मावच्छिन्नाभाववान्नस्यात्तदानद्वृत्तोत्पत्तिप्राक्क्ष
णःस्यादित्येवापादनीयमतोनकश्चिद्दोषइत्यतआहदुमन्येति · तथाचजन्यद्रव्यादिसामान्यस्यैव
द्रव्यादित्वाभावत्वेननहेतुत्वात् उत्पन्नस्यघटादेर्द्वितीयक्षणेपुनर्नोत्पादः नन्वेवमेकतंतुसंयोगनाशा
न्महापटनाशोत्तरमवस्थितेष्वंशुसंयोगोप्यवयवपटांतरोत्पादःदशायांपुनर्महापटोत्पत्तिवारणा
यप्रागभावस्यहेतुत्वमावश्यकं · द्रव्यसामान्याभावस्यप्रागवसत्वात् · कार्योत्पत्तिक्षणेकार्येणाप्रतिबं
धासंभवादितिवाच्यं · तत्रविनष्टतंतुसंयोगव्यक्तेर्महापटंप्रतिविशिष्यहेतुत्वात्तदभावादेवतदानीमम
हापटोत्पत्त्यसंभवात् · अतिरिक्तस्यप्रागभावधर्मिणःकल्पनामपेक्ष्यलोकानायांतंतुसंयोगव्यक्तेरेवविः

३३

शिष्टमहापटप्रतिहेतुतायाः कल्पनार्हत्वात्। न च तंतुसंयोगव्यक्तेर्विनत्त्समनियतसंयोगांतराणाम
पिविगमनाविरहाद्विशिष्टहेतुत्वापत्तिः। तेषामन्यथासिद्धत्वस्य सर्वसिमतत्वात्। नचैवमपि महापटो
त्पत्तिर्दशायामेवउक्तरूपेतेभाविखंडपटोत्पत्तिः स्यात्। कार्यस्य पूर्वमसत्वेन प्रतिबंधायोगादि
ति वाच्यं। महापटध्वंसस्याप्युत्तरपटं प्रति विशिष्टहेतुत्वात् अन्यथा प्रागभाववादिनामपि तत्र प्र
तीकारानुपपत्तिरिति संक्षेपः। लाघवादिति। न च प्रागभावस्वीकारेपि कार्यस्य प्रतिबंधकत्वमावश्
यकं अन्यथा यत्र पटोपष्टब्धतंतावेव पटातंतरस्यारंभकमुसंयोगस्तत्र पूर्वपटसत्वेपि तत्राशे
तरभाविपटस्य पटोपष्टब्धतंतावुत्पत्तिप्रसंगात् तत्प्राभावस्य सत्वात्। तथा च लाघवोपन्यासोऽनुचित
इति वाच्यं। तत्रैव पटोपष्टब्धे तंतावुत्तरपटस्येनदानीमुत्पत्तिकारणीयपूर्वपटध्वंसस्योत्तरपटं
प्रतिहेतुतावश्यकत्वे प्रागभाववादिना कार्यस्य प्रतिबंधकत्वाकल्पनादन्यथोदासीनत्वंतोद्व्यसामा

३९

५४

न्याभावस्य तदानीमपि सत्वात् तन्नोत्तरपटस्य तदानीमुत्पत्तावेकतंतुकपटस्याकारणापत्तेरिति भावः। का
कार्यादिपदेन कार्यसमानकालोत्पत्तिकध्वंसानां परिग्रहः तेन निर्विकल्पकव्यक्तीनां तृतीयक्षणे
नाशेपि चतुर्थक्षणे पुनर्नोत्पादः तत्र निर्विकल्पकसमस्य कालोत्पन्नध्वंसैः प्रतिबंधादन्यथा
निर्विकल्पकहेतुभूतायाः सन्निकर्षादिव्यक्तेस्तृतीयक्षणेप्यनुवृत्तेश्चतुर्थक्षणे पुनस्तदुत्पत्ति
प्रसंगात्। यद्यपि निर्विकल्पकसमानकालोत्पन्नानंतध्वंसव्यक्तीनां तन्निर्विकल्पकं प्रति विशिष्याप्र
तिबंधकत्वकल्पनामपेक्ष्य लाघवादेकप्रागभावस्यैव हेतुः कल्पयितुमुचितस्तस्यैव कारणत्वेनैव व्य
भिचारकप्रमाणतः सिद्धानेतरे विनिगमनाविरहः न च तत्तन्निर्विकल्पसमकालोत्पत्वस्त्वंतरप्रागभाव
व्यक्तीनां तत्तन्निर्विकल्पकप्रागभावस्य वा तन्निर्विकल्पकं प्रति हेतुत्वमित्यत्र विनिगमनाविरह
स्तादवस्थ्य एवेति वाच्यं जन्यभावत्वावच्छिन्नं प्रत्येव प्रागभावत्वेन हेतुत्वं तत्र कार्यस्य तादात्म्यकार

३९

णस्य प्रतियोगित्वं संबंधत्वेनानुगतरूपेण हेतुतायां एकवस्तुप्रागभावस्य वस्त्वंतरहेतुत्वासंभवात् तथापि
यथान्वयव्यतिरेकसिद्धविशेषणानामपि निर्विकल्पककालोत्पन्नध्वंसानां प्रतिबंधकत्वे परित्यज्य निर्वि
कल्पकहेतुत्वेन पदार्थांतरकल्पनं तर्हि दाहादावपि मणिमंत्रादीनां प्रतिबंधकत्वमपेक्ष्य लाघवाद्दाहे
पधापकत्वेन वस्त्वंतरकल्पनाप्रसंगः तस्मात्क्रमवस्तूनां नियामकत्वासंभवात्स्थले एवकारणत्वेन
वस्तुसिद्धिरित्याशयः शेषमशेषग्रे वक्ष्यामः सामग्रीकारणत्वं न कार्योत्पत्तिप्राक्कारणत्वप्र
योजकत्वात् अतिरिक्तप्रागभावकल्पनापत्तिरूपप्रतिकूलतर्कपराहतत्वाच्च । किंतु कार्योत्पत्तिद्वि
तीयक्षणोपादिसामग्र्य - व्यवहितोत्तरक्षणस्य कार्योत्पत्तिमान्स्यादित्येव व्याप्तिः तत्र च साम
ग्र्यव्यवहितोत्तरत्वं सामग्रीसमयध्वंसाधिकरणसमयध्वंसानधिकरणत्वे सति सामग्रीसमय
ध्वंसाधिकरणत्वरूपं कार्यद्वितीयक्षणादावसिद्धं कार्योत्पादक्षणेन व्यवधानात् इति कुतस्ते

३५

35

नपुनरुक्त्यादः प्रसंजनीयः इत्यादिकं प्रतिबंधकत्वेनापीत्यपि कारणत्वमितिं ननु तत्पूर्ववर्त्तित्वं तदुत्पत्ति-
कालीनध्वंसप्रतियोगिकालवृत्तित्वरूपं प्रागुक्तं तत्र चोत्पत्तिः तदधिकरणक्षणावृत्तिप्रागभाव
प्रतियोगिसमयसंबंधरूपैव निविष्टा सा च विना प्रागभावं दुर्वचेत्यत आह तदुत्पत्तिश्चेति- स्वा
धिकरणेति- यस्योत्पत्तिलक्षणस्य तदेव घटादिकं स्वपदेन ग्राह्यं तथा च तदधिकरणसमयध्वंसान
धिकरणेन सार्द्धं तस्य समयसंबंधः कालिकसंबंधः तदुत्पत्तिरित्यर्थः घटाद्युत्पत्तिक्षणस्यापि वि
षयित्वाव्यभिचारित्वसंबंधेन घटाद्यधिकरणीभूतं यत्पूर्वोत्पन्नज्ञानादिकं तद्ध्वंसाधिकरणत्वा
तः उत्पत्तिमात्रे ऽसंभवस्यादतः कालिकसंबंधेन स्वाधिकरणत्वलाभाय ध्वंससमयपदं- इह हेतावुपा
धिनैहोपाधिरित्यादिप्रतीत्याव्यभिचारादिसंबंधस्याप्यधिकरणत्वनियामकतायाः स्वयमेवाग्रेवक्ष्य
माणत्वात् अस्तु वा न घटादिगोचरस्य ज्ञानादेरुत्पत्त्याव्याप्तिवारकं तत्र अन्यथा तादृशज्ञानोत्पत्तिक्ष

एम

३५

णास्यापि विषयत्वापात्तज्ज्ञानाधिकरणीभूतं यन्नष्टघटादितद्ध्वंसाधिकरणत्वेनैव्याप्तिप्रसंगात् घटे
ज्ञानमित्यादि अवसरकालेन विषयताया वृत्तिनियामकत्वादिति ध्येयं तत्तद्घटादिसमयध्वंसानधि
करणीभूतेन तत्तद्घटादिपूर्वोत्तरज्ञानादिना विषयत्वादिसंबंधस्य पूर्वमपि तत्तद्घटादेः सत्त्वात्तज्ज्ञाति
व्याप्तिवारणाय द्वितीयं समयपदं अत्रेदं नु ध्वंसस्य दिनोत्पत्तिक्षणे किंमानमित्यत आह कायमाचार्यसंवा
दमाह अथध्वस्तेति ध्वस्तः क्षणयोगस्तदीयक्षणसंबंधो यत्र कालेतादृशस्य क्षणयोगः कालिकसंबं
धस्तस्य जनिरुत्पत्तिरित्यर्थः तदीक्षणयोगध्वंसाभावावच्छिन्नस्य वस्तुनः क्षणयोगो जनिरित्य
र्थो वा क्षणादुपप्रवेशे वैयर्थ्याद्याचष्टे क्षणः समय इति प्रलयसत्त्वे नद्युत्पत्तावव्याप्तिस्तदधिकरण
समयस्य महाकालादेर्ध्वंसाप्रसिद्धेः अत उक्तं महाप्रलयानंगीकार इति तदंगीकारे महाप्रलयांगीका
रे कश्चिदित्यादि अत्र यत्पदं यस्य घटादेरुत्पत्तिर्लक्ष्यं तत्परं तद्घटीयत्वं तीयपदितक्षणसंबंधेन त

३६

36

रीयद्वितीयक्षणवृत्तिध्वंसप्रतियोगित्वाभावात्तत्र द्वितीयद्वितीयक्षणसंबंधे गतिर्व्यभिचारतः क्वचिदपी
त्युक्तं तथा च पदीयसमयसंबंधसामान्ये यत्समयवृत्तिध्वंसप्रतियोगित्वं नास्तीत्यर्थस्तथा च तत्सा
मान्यांतर्गतप्रथमक्षणसंबंधे एव द्वितीयक्षणवृत्तिध्वंसप्रतियोगित्वविरहान्न तत्रातिव्या
प्तिः चरमध्वंसीयसमयसंबंधसामान्य एव तद्वृत्यन्तिक्षणवृत्तिध्वंसप्रतियोगित्वाभावाच्च न महाप्र
लयोत्पत्तावव्याप्तिः तत्तद्व्यादेः पूर्वोत्पन्नक्षणानादिनाविषयत्वादिसंबंधस्यापि सामान्यांतर्गतत्वा
त्तत्र च तत्कालिकविशेषणतारूपद्व्यणुकोत्पत्तिक्षणवृत्तिध्वंसप्रतियोगित्वस्यैव सत्वात्तदुत्पत्ति
मात्रेऽसंभवः स्यादतः प्रथमं समयपदं तथा च तदीयकालिकविशेषणतारूपसमयसंबंधसामा-
मान्ये इत्यर्थः तेन जन्यमात्रस्यैव समयतया ज्ञानस्यापि तथात्वात्समयपदोक्तावपि ज्ञानविषयत्वा
दावतिव्याप्तिरिति प्रत्युक्तं प्रत्युक्तं च तदीयसमयसामान्यत्वस्यैव सम्यक्त्वात्संबंधपदं व्यर्थमित्या-

३६

दिदूषणापत्तदोषेन समयपर्यन्तम्बधेन वैयर्थ्यानवकाशादिति ध्येयं यत्र घटोत्पत्तिप्राक्क्षणे सर्वध्वंसा
त्ताकारकं ज्ञानमस्तु तदनन्तरं तत्र तज्ज्ञानव्यक्त्या समं घटीयकालिकसंबंधस्याविलक्षत्वात्तत्राव्या
प्तिः घटीयकालिकसंबंधसामान्यस्यैव विवक्षितत्वात् न ज्ञाने वर्त्तमानस्य ध्वंसस्य प्रतियोगित्वाद्
अतः कालिकसंबंधेन वृत्तेर्जातेर्भावद्वितीयसमयपदं यदि सैव च विषयितापात्रस्य नियामकत्वाद्घ
टवृत्ति ध्वंसप्रतियोगित्वं नास्ति त्वुक्तावपि नोक्तदोष इति विभाव्यते तदायं घटद्वितीयक्षणवान्य
घटोत्पत्तिक्षणावत्वात्तदुत्पन्ने हेतोर्घटाघक्षणक्षणसंबंधध्वंसस्तु पाधिरिति प्रतीत्या व्यभिचारादिसंबंधे
न घटोत्पत्तिक्षणेपि घटोत्पत्तिक्षणध्वंसस्य सत्त्वादुत्पत्तिमत्त्वेऽसंभव एव तस्मात्तो द्वितीयसमयप
दं घटादेः स्वपूर्वोत्पन्नज्ञानादिविषयतायामतिव्याप्तेस्तृतीयसमयपदं तत्तु समसंबंधः कालिकः
विशेषणतासाच यदि समवायादिसंबंधवद्वैकेवलान्तुस्वरूपसंबंधस्तदा तदीयसंबंधसामान्य एव

३७

37

तदीयपदार्थीयदण्डावृत्तिध्वंसप्रतियोगितावत्त्वाति व्याप्तिरतश्चाह तदधिकरणेति यत्तु महाप्र
लयवृत्तिध्वंसप्रतियोगितात्वावच्छिन्नाकाशसिद्धान्ततुल्यत्वाव्याप्तिः ध्वंसप्रतियोगितात्वेनै
वलघुधर्मेण तादृशप्रतियोगितावच्छेदात् तत्तदधिकरणत्वादिति तत्तुच्छं गुरुधर्मस्य प्रति
योगितानवच्छेदकत्वेऽपि मलत्वेऽपि तदधिकरणत्वावृत्तित्वस्याप्रसिद्धिप्रसंगात्
तदधिकरणत्वावृत्तित्वनिष्ठप्रतियोगितायाः कालिकसंबंधावच्छिन्नमतद्वृत्तित्वेनै
वलघुधर्मेणावच्छेदात् जन्यमात्रस्यैव कालोपाधित्वात् तत्समयवृत्तिध्वंसप्रतियोगित्वं
नास्तीत्यत्र तादृशप्रतियोगित्वाभावकूटस्यैवाविवक्षणे गुरुधर्मस्यावच्छेदकत्वेऽप्यु
क्ताव्याप्तेरभावाच्चेति दिक् स्ववृत्तिरिति तथा च यत्समयवृत्तिध्वंसप्रतियोगित्वे यदसाम
धिकरणावृत्तित्वव्याप्यं तेन सार्द्धं तद्देशकेः समयसंबंधस्तद्देशकेऽनुपपत्तिरित्य

३८

र्थः घटाघकत्पत्तिकालीनध्वंसप्रतियोगित्वं तघटाघधिकरणकालावृत्तित्वव्याप्यं न च मात्रस्यैव घटा
घधिकरणस्थूलकालवृत्तित्वाद्वित्वसंभववारणाय क्षणपदं· घटादिद्वितीयक्षणावृत्तिध्वंसप्रतियो
गित्वस्य विरातीति घटाघधिकरणक्षणावृत्तित्व. सामानाधिकरण्यकद्वितीयादिक्षणसंबंधेऽ
तिव्याप्तिरतो व्याप्यपदं· यघपि विनष्टनिष्ठद्वितीयादिक्षणावृत्तिध्वंसस्य पातित्वं विद्यमानति
योगित्वं घटाघधिकरणक्षणावृत्तित्वव्याप्यमेव तथापि तदधिकरणक्षणावृत्तित्वं प्रत्स
मयवृत्तिध्वंसप्रतियोगित्वव्यापकं तत्समयसंबंधत्वविवक्षितः न च जन्यमात्रस्यैव का
लोपाधित्वान्नदवृत्तित्वं यत्समयवृत्तिध्वंसप्रतियोगित्वव्यापकं तत्समयसंबंध एवात्यन्ति
रस्कयथासन्निवेशे विपर्य्यविरहात् इति भावः चिरातीतज्ञानवृत्तिध्वंसप्रतियोगिनः
सर्वस्यैव घटाघधिकरणक्षणावृत्तित्वाद्धटादिनिष्ठतद्दोषविषयत्वादिसंबंधेऽतिव्या

३८

38

मिरतः समयसंबंधेति ॥ ननु तदधिकरणलक्षणावृत्तित्वेत्यत्र लक्षणत्वं स्ववृत्तिप्रतियोगिकप्रागभावान
धिकरणसमयत्वं तच्च प्रागभावं विना दुर्वचमत आह लक्षणत्वं चेति ॥ यत्तु स्वजन्यविभागप्रागभा
वावच्छिन्नकर्मत्वरूपलक्षणत्वे प्रागभावासत्त्वे दुर्वचमतोऽन्यथा निर्वक्ति लक्षणत्वं चेति ॥ तन्न प्रल
योत्पन्नाव्याप्तिभिया विभागप्रागभावावच्छिन्नकर्मणः लक्षणत्वशंकाया एवानुत्थानात् स्ववृत्ती
ति ॥ स्ववृत्तिर्यो ध्वंसस्तत्प्रतियोग्यधिकरणं पघत्तदन्यसमयत्वमर्थः स्ववृत्तित्वं प्रतियोग्यधि
करणत्वं च कालिकसंबंधेन बोध्यं तेन लक्षणानां यथा कथंचित्संबंधेन स्वस्मिन्वर्त्तमानस्य स्वोत्तरो
त्पन्नध्वंसस्य प्रतियोगित्वेपि नाव्याप्तिः नवा स्वस्मिन्कालिकतया वर्त्तमानस्यैव ध्वंसस्य प्रतियो
गिनः पूर्वोत्पन्नज्ञानादेर्विषयतयाधिकरणत्वेप्यसंभवः ॥ नित्यवस्तुव्युदासाय समयपदं लक्ष
णमिदं लौकिकस्यांत्यशब्दादेर्गीकारएव अन्यथाक्रियादेः स्ववृत्तिध्वंसप्रतियोग्यधिकरणता

एम

३८

तः प्रलयान्त्यक्षणमात्रेणैवाव्याप्तिप्रसंगात् अतस्तदनंगीकारेप्याह स्ववृत्तीति · स्ववृत्तिर्यो ध्वंसस्तत्प्र
तियोगिप्रतियोगिको यावान् ध्वंसस्तद्विशिष्टसमयत्वमित्यर्थः तथा च क्षणिकपदार्थसत्वेपि स्थि
रणामेवात्यन्तक्षणावच्छेदेन तादृशयावद्ध्वंसविशिष्टतया तत्क्षणत्वमिति भावः यावद्ध्वंसविशिष्टस
मयत्वं महाप्रलयान्त्यक्षणमात्रव्याप्तमतः प्रतियोगिकांतं तदपि ध्वंसविशेषणं · सृष्टिकालीनक्षण
मात्रस्यैव स्वोत्तरैतत्कालपदार्थात्यंताभाववत्वात्तत्प्रतियोगिकध्वंसवैशिष्ट्याभावादव्याप्तिनाद
स्यमतो ध्वंसपर्यंतं · अत्र च ध्वंसस्य स्ववृत्तित्वं कालिकसंबंधेन बोध्यं · तेन यथाकथंचित् व्यभि
चारादिसंबंधेन तत्तत्क्षणवृत्तीनां तत्तत्क्षणोत्तरोत्पन्नध्वंसानां कालिकसंबंधेन वैशिष्ट्यस्य तत्त
त्क्षणेषु विरहेपि नाव्याप्तिः प्रहरादीनामपि स्ववृत्तिध्वंसप्रतियोगिप्रतियोगिकयत्किंचिद्ध्वंस
विशिष्टत्वादिति व्याप्तिरतो यावत्पदं · संनष्टघटप्रतियोगिकसंयोगादेरपि स्ववृत्तिध्वंसप्रतियोगि

प्रतियोगिकत्वाद्यावर्त्तद्वैशिष्ट्यस्य च क्वचिदपि त्वेणाविरहादसंभवः स्यादतोऽभावनिरूपितस्य प्रतियो
गिताविशेषस्योक्ताभावप्रसंगः ध्वंसपदं तेनाभावत्वमपेक्ष्य जन्याभावरूपस्य ध्वंसत्वस्य गुरुत्वेपि न
क्षतिः तस्याप्रविष्टत्वात् अभावत्वस्यैव ध्वंसत्वस्याप्यखंडत्वमतो पर्यंशंकानवकाशाच्च सर्वध्वं
सा इति ज्ञानेपि निरुक्तपावत्वं एणनां विषयितयावैशिष्ट्यस्य त्वेणा द्यावछेदेन सत्वाज्ञातिव्याप्तिर
तः समयपदं कालिकसंबंधेन वैशिष्ट्यत्वाभावप्रमहाप्रलयावछेदेन गगनादेरपि निरुक्तपाव
ध्वंसविशिष्टत्वादति व्याप्तिरतः समयपदं जन्यार्थकमिति तन्न यथोचितसंबंधेन स्ववृत्तित्वमादा
याति व्याप्तिमिपाकालिकसंबंधेन स्ववृत्तित्वस्यवाच्यतपाततसंबंधेन गगनवृत्तित्वाप्रसिद्धोवत
ज्ञाति व्याप्त्यसंभवात् महाप्रलयावछेदेन महाकालस्य तुतादृशयावत् ध्वंसविशिष्टतयाणत्वेन त्व
तिकरमिति ध्येयं लाघवादाह स्ववृत्तियावदिति ध्वंसत्वंपदि जन्याभावतं नाखंडोपाधि

त्तराजन्यत्वप्रवेशे वैयर्थ्यं· प्रागभावानंगीकारे गमाभावत्वघटितस्यैव सम्यक्त्वादित्याशयेन लक्ष
णांतरमाह स्ववृत्तीति· यावद्भाववैशिष्ट्यं न कस्यापि क्रियादेरतः स्ववृत्तीति· स्ववृत्तियावत्पदा
र्थवैशिष्ट्यमपि न कस्यचित् स्थिरस्येत्यव्याप्तिरत उक्तमभावेति· कापीत्यन्तिलक्षणसामग्रीलक्ष
णे तत्र घटइत्यादिव्यवहारोपयिकं विनश्यदवस्थक्रियायाः लक्षणत्वमुक्त्वा घटपूर्ववृत्तसामग्रीलक्ष
णे जायत इत्यादिव्यवहारोपयुक्तमुत्पत्त्यवच्छिन्नक्रियादेर्लक्षणत्वमाह स्वेति· स्ववृत्तिः
सन्स्वपूर्ववर्ती यावान्पदार्थस्तद्विशिष्टसमयत्वमित्यर्थः· स्ववृत्तियावत्पदार्थवैशिष्ट्यस्वपू
र्ववर्तियावत्पदार्थवैशिष्ट्यं वा न कस्यापि स्थिरस्य क्रियादेः संभवति स्वोत्तरोत्पन्नस्वपूर्वनष्ट
योः स्वस्मिन्नसत्त्वादिति स्वभयमुपात्तं पदार्थेति तु स्वरूपकथनं न तु प्रविष्टं वैयर्थ्यात्· न च स्वोत्तरव
र्तियावत्पदार्थविशिष्टत्वमित्येवमस्तु कृतं स्वमारणस्वपूर्ववर्तिपदत्यागस्वध्वंसकालीनत्वरूप

५० स्वोत्तरत्वप्रवेशे लाघवादंलक्षणावच्छिन्नक्रियादेरेव तथात्वादिति वाच्यं। स्वोत्तरवर्त्तित्वस्याप्रसि
द्ध्या प्रलक्षणाव्याप्तिप्रसंगादिति भावः प्रकृतादेरपि स्वस्वपूर्व्ववर्त्तियत्किंचित्पदार्थविशिष्टत्वा
त्तद्दूरणाय यावदिति। न च यावत्त्वस्यैकस्याभावात्सातिस्विकरूपेणोपादानेऽत्र नतिप्रसं
410 क्तेयत्किंचित्पदार्थप्रवेशावश्यकत्वे शेषवैयर्थ्यमिति वाच्यं स्वपूर्व्ववर्त्तिपदार्थत्वव्यापक स्व४
तावच्छेदकाधिकरणतावत्त्वस्यैव लक्षणत्वाभावत्यदेन तादृशव्यापकत्वलाभात्समय
पदं तु स्ववृत्तिस्वस्वपूर्व्ववर्त्तित्वस्य तादृशयावत्पदार्थवैशिष्ट्यस्य च कालिकसंबंधावच्छि
न्नत्वलाभार्थं तेन विषयत्वादिसंबंधेन स्वनिष्ठस्य चिरातीतज्ञानादेरुत्पत्त्यवच्छिन्नक्रियादौ
कालिकसंबंधेन वैशिष्ट्यविरहेऽपि नाव्याप्तिः न वा लक्षणमात्रस्यैव विषयतया स्वपूर्व्ववर्त्तिनः
कालिकसंबंधेन च स्थितिलक्षणावच्छेदेन स्ववृत्तेर्ज्ञानस्याघलक्षणावच्छेदेन कालिकतया वैशि ४०

स्याविरहेप्यसंभवोनापिसर्वपदार्थाइतिज्ञानस्याप्युत्पत्त्यवच्छिन्नस्यलक्षणत्वाद्विषयितपातदीयवैशि
ष्ट्यस्यलक्षणाद्ययावच्छेदेनसत्वात्तन्नातिव्याप्तिरितिनंलक्षणलक्षणांतर्गतं:स्वपूर्वत्वंस्वोत्पत्तिकाली
नध्वंसप्रतियोगित्वंतदंतर्गतावोत्पत्ति:लक्षणघटितेत्यन्योन्याश्रयइत्यतआहस्वपूर्वत्वंचेति· १
स्वाधिकरणीभूतक्षणोत्पादिलक्षणवृत्तिध्वंसप्रतियोगिकालवृत्ते:स्ववृत्तिपदार्थस्याघटक्षणाव
च्छेदेनस्वस्मिन्वैशिष्ट्याभावात्स्वलपा■न्यलक्षणमात्राव्याप्तिरत:स्वपूर्वत्वनिरुक्तौयावदिति
कालविशेषणांदत्ते·ननुक्रियामात्रस्यैवकालोपाधित्वात्तल्लक्षणमिदंप्रलयलक्षणव्याप्तं·
८।३ एवंतदुत्पत्तिवृत्त्यत्तिलक्षणमपीत्यतआहजन्येति·मात्रपदं कृत्स्नार्थकंतथाचतदानींक्रिया
यात्रभावेपिचरमध्वंसरूपकालोपाधिमादायैवलक्षणसमर्थनमिति-नित्यस्यका
लिकसंबंधेनाव्यावर्तकतयाजन्यावच्छिन्नस्यैवतस्यकालोपाधित्ववाच्यमतोजन्यस्यैवत

८२

४१ 41

प्यात्वमुचितमित्याशयेन पदार्थमात्रं परित्यज्य जन्यमात्रस्येत्युक्तं । केचित्तु । ननु महाप्रलयावच्छे-
देन स्ववृत्तिपावध्वंसविशिष्टत्वादिलक्षणाक्रांतस्य महाकालस्यापि लक्ष्यत्वात्तत्रेदं ल-
क्षणमव्याप्तं निरुक्ततत्त्ववत्ताप्रसिद्धेरत आह जन्यमात्रस्येति । तथा चोत्पत्तिघटकल-
क्षणलक्ष्यमहाकालेऽसत्त्वेऽपि न क्षतिः । जन्यं कालोपाधिरूपं लक्षणमादोषे च सर्वत्रैवोत्पत्ति-
लक्षणसंभवादिति भावः इत्याहुः । केषांचिदुत्पत्तिलक्षणमाह योयदित्यादि । सर्वध्वंसाद्
स्थ भाकार विनश्यद्व[illegible]त्वबुध्या सार्धं घटीयकालिकसंबंधस्यापि लक्ष्यतया तत्राव्याप्तिः तादृ-
शबुद्धौ विषयितया वर्त्तमानस्य ध्वंसस्य प्रतियोगिनि भाविकाले घटस्यावृत्तेरतो ध्वंसस्य
कालिकसंबंधेन वृत्तित्वलाभाय कालपदं । एवं तर्हि शब्दध्वंसप्रतियोगिवृत्तित्वं तस्यतद्वृत्ति-
त्वमित्यत्र च वृत्तिमत्त्वं कालिकसंबंधेन बोध्यं । तेनातीतविषयकज्ञानस्योत्पत्तौ नाव्याप्तिः

४१

विषयतासंबंधेऽति व्याप्तिर्वा। अत्र तत्तत्समयवृत्तिध्वंसप्रतियोग्यवृत्तित्वे सति तत्तत्सम
यवृत्तित्वरूपानन्तत्क्षणोत्पन्नयावद्वस्तूनां मध्ये कोत्पत्तिर्न लाघवभेदेन विभिन्नो [illegible] योपदिश्यनयोर
[illegible] र्ल ह्यप्रदर्शनमात्रपरत्वात्। न च ध्वंसप्रतियोगिवृत्तित्वमपेक्ष्य समसमयवृत्तिध्वंस
प्रतियोगिवृत्तित्वत्वस्य गुरुत्वात्तदवच्छिन्नाभावाप्रसिद्ध्या महाप्रलयोत्पत्तावव्याप्तिरिति
वाच्यं। आगेवदत्तो जरत्वादिति ध्येयं। स्वानधिकरणेष्विति। तंतुमात्रस्यैव तंतुत्वेन तत्प
टत्वरूपयोग्यत्वात्तदनधिकरणे तंतुष्वपि तत्सामग्रीसत्त्वादिति भावः। न च तत्पटत्वस्य
कार्यतानवच्छेदकत्वात्तदवच्छिन्नस्यान्यत्रापत्त्यसंभवः तु पटत्वावच्छिन्नसामग्रीसत्त्वे च प
टत्वावच्छिन्नमन्यत्रोत्पद्यतामेवेति वाच्यं। पटमात्रस्यैव तत्पटत्वेन कार्यत्वस्यावश्यकत्वात्

श्री०
अन्यथा पत्रतंतुत्रयारब्धपटस्यैकतंतुनाशादिनाशे सति उत्तरक्षणे एव तदारंभकतंतुत्वं तदस्य

नाशस्तत्र तदानीमेवावस्थिततंतोपरांतरीत्यादप्रसंगात्॰ परत्वावच्छिन्नस्य सामग्रीसत्वात् न चेष्टा
पत्तिः एकतंतुकपटस्यानंगीकारात् न च विनश्यत्तंतुमाद्यपटोत्पादः कार्यकलावृत्तेः समवायि
त्वायोगात्॰ तस्मात्स्वसिद्धतत्तत्पटव्यक्तिंप्रति विशिष्य क्षमकारणस्य विरहेपि तत्परसामा
न्यस्यानुत्पत्तिरतस्तत्तत्पटत्वावच्छिन्नस्यापि स्वानधिकरणोत्पत्तिसंभव इति भावः स्वह
स्तादीनामिति॰ तदारंभकेत्यादिः तत्तत्तंतुत्वेनेत्यादिन च समवायेन तत्पटं प्रति तादात्म्येन त
तंतुत्वेन हेतुत्वे मिथो व्यभिचारः कालिकसंबंधेनैव विशेषतः कार्यकारणभावस्वीकारे तत्प
टानधिकरणतंतुषूत्पत्तिवारकं संभवतीति वाच्यं॰ तत्तत्तंतुनिरूपितसमवायेन तत्पटं प्रत्येव
तादात्म्येन तत्तत्तंतोर्हेतुत्वात्॰ तादृशसमवायेन तत्पटस्यान्यत्र तंतावसत्वेन व्यभिचारासंभ
वात् न चैवं तादृशसमवायेन स्वानधिकरणतंतुषु तत्पटस्यानुत्पादेपि समवायमात्रेणतत्पटो

त्वादौ दुर्वार इति वाच्यं॰ समवायमात्रस्य तादृशकार्यतानवच्छेदकत्वात् तत्संबंधेनान्यत्र तत्पटोत्पसं
भवादिति भावः। यत्तु समवायेन तत्पटत्वावच्छिन्नं प्रत्येव तत्तत्तंतुत्वेन हेतुत्वं तावत्तंतुनिष्ठसहस्र
त्वादिसंख्याया एव कारणताघटकसंबंधत्वेन व्यभिचारसंभवादिति तन्तुच्छ॰ यस्य तंतोर्द्वितीय
क्षणे एव तंत्वंतरसंयोगोत्पत्त्या तृतीयक्षणे सहस्रतंतुकपटोत्पत्तिस्तत्रैव तंतौ व्यभिचारतादव
स्थ्यात् सहस्रत्वादिसंख्यायाः समानाधिकरणयावदेकत्वसापेक्षितत्पादृश्योत्पत्तिद्वितीयक्ष
णे तदसंभवात्। केचित्तु॰ यावंतः कार्यतावच्छेदकधर्मावच्छिन्नास्तत्त्वेकस्यापत् किंचिदाश्रय
निष्ठाभावप्रतियोगितानवच्छेदकधर्मवत्त्वमेव कारणताघटकं तथा च समवायेन तत्पटत्वावच्छिन्नं
प्रत्येव तादात्म्येन तत्तत्तंतुत्वेन हेतुत्वं स्फुटं। तत्पयाश्रयीभूततत्तत्तंतौ तत्तत्तंतुभेदस्यासत्त्वात्॰ एतेन
संयोगादिकं प्रति स्वकर्मादेः कारणत्वं व्याख्यातं॰ नैवं द्वितीयक्षणस्यापि द्रव्ये द्वित्वाद्युत्पत्ति स्या

५२

43

तद्व्यक्तेरेकत्वमादायोक्तक्रमेण सामग्रीसत्वादिति वाच्यं । दुष्टत्वात् । पावकत्वप्रवेशस्य वन्हित्वावच्छि-
न्नेप्रत्येव तृणत्वादिना हेतुत्वकारणार्थं नंत्वेवं कार्यसमानाधिकरणवृत्तिधर्मवत्वमेव कारणत्वे
निवेश्यतामन्यथासिद्धिनिरूपकत्वदलेनैव व्यापकतानवच्छेदकान्तर्भावदोषसंभवादिति वाच्यं
व्यभिचारप्रसरप्रतिबध्यतया तस्य कारणस्वरूपत्वाभावादित्याहुः । ननु क्लृप्तापि प्रागभावव्यक्तिः
कथं नान्यत्र कार्यमर्जयतीत्यत आह स्वैवेति । सामानाधिकरण्यप्रत्यासत्त्यैव तस्य हेतुत्वादिति भावः ।
ननु एवमपि दृढं तन्तुकपालादौ न तत्सिद्धिः तत्रातिरिक्तस्य प्रागभावधर्मिणः कल्पनामपेक्ष्य क्लृ-
प्ततन्तुसंयोगव्यक्तेरेव लाघवेन हेतुत्वौचित्यात् अत आह दृष्टं चेति । कार्योत्पादनियामकतया चे-
त्यर्थः । प्रागभावत्वेनेति । तत्प्रागभावव्यक्तित्वमात्रत्वासिद्धेर्नानुरूपेण हेतुत्वाभिधानमनुचितमिति
तु विभावनीयं । प्रागभावस्वीकारेपि तत्तन्तुव्यक्तीनां तत्तच्चरमतन्तुसंयोगव्यक्तीनां वा तत्तत्प्र-

५३

त्ति विशिष्यहेतुत्वस्यावश्यकत्वे कृतं प्रागभावकल्पनयेत्याशयेन समाधत्ते । त्रिचतुरेष्वेवेति अस
मवायिकारणसंयोगस्यैवाह । संयुक्तेष्वेवेति । त्रितन्तुकस्य चतुस्तन्तुकस्य वा पटस्यावश्यमुत्पत्तेः प
टसामग्र्याः पत्त्युपसंभवादाह । तत्त्वेति । सहस्रादितन्तुकपटोत्पत्तिप्रसंगदित्यर्थः । प्रागभावादिघ
टितायास्तत्पटसामग्र्याः तदानीमपि सत्त्वादिति भावः । यद्यपि सर्वत्रैव खण्डपटध्वंसस्य महापट
हेतुतयात्रिचतुरादितन्तुकपटस्य ध्वंसविरहादेव त्रिचतुस्तन्तुसंयोगदशायां न सहस्रादितन्तुक
पटस्योत्पाद इति चरमतन्तुसंयोगादस्तु तत्र विशिष्य हेतुत्वमानाभावः । न च खण्डपटध्वंसस्यैव चरे चे
मसंयोगव्यक्तौ नाशमपि विगमनाविरहादेव तत्र हेतुत्वमिति वाच्यं । चरमसंयोगोत्पत्त्यनन्तरमेव
उपरध्वंसदशायामेव महापटोत्पत्तिप्रसंगेन खण्डपटध्वंसस्यावश्यं महापटहेतुत्वात्तथा
पि त्रिचतुरादितन्तुकखण्डपटध्वंसस्यैव सर्वसमानाधिकरणसहस्रत्वादिसंख्यासंबंधेन स

५५

हस्तादितंतुकमहापटं प्रतिहेतुत्वादेवस्यानधिकरणातंतुषु तत्पटानुत्पत्तिसंभवे प्रागभावकल्पने मानाभाव
इत्यत्रं तात्पर्यं शंकते तावदिति · विनेति · तंतुतत्संयोगयोस्तंतुत्वविलक्षणतत्संयोगत्वाभ्यां पटं प्रतिहेतुत्वे
नतदवच्छिन्नविरहस्यासंभवादिति भावः कार्यानुत्पादप्रयोजकस्याभावमुक्त्वा कार्योत्पादप्रयोजकस्य
सत्वमाह सामग्रीति · पुनः शंकते तत्पटेति · यावत्तंतुत्वेन हेतुत्वस्यासंभवादाश्रयांते · तत्पटप्रागभा
वाश्रयस्य कस्यचित्तंतोः सत्वादिति प्रागतादवस्थमतो यावदिति · प्रवेशेत्यादि · प्रवेशे कारणताव
च्छेदकतयान्यथासिद्धत्वमप्रवेशे तुवस्यकठात्वात तत्पटप्रागभावाश्रयानामेवतंतूनां तावत्तंतुत्वेन हेतु
त्वेन प्रागभावस्यहेतुत्वे मानाभाव इत्यर्थः ननु मा भूत्प्रागभावस्यहेतुत्वं कारणतावच्छेदकतयैव तत्
सिद्धिर्भविष्यतीत्यत आह परस्परेति · तत्पटप्रागभावाश्रयत्वावच्छिन्नानां तंतूनां इदानीमनपायादिति भा
वः तत्पटप्रागभावव्याप्येति · तत्पटप्रागभावानधिकरणावृत्तीत्यर्थः संयोगसत्त्वाभ्यामकोयायत्वः ते

44

९७

नतत्पटप्रागभाववन्मात्रवृत्तीनामनारंभकसंयोगांतराणां तत्पटात्पूर्वमसत्त्वेपि न क्षतिः तत्पटप्रा
गभावसामानाधिकरण्यस्य तत्पटानाधारतंतुवृत्तिपटांतरारंभकातीतसंयोगसाधारणत्वाद्वेष्य
तापर्यंतानुसरणं। तंतुसंयोगेष्विति। पटारंभकेष्वित्यादिः तन्तुतत्पटप्राक्क्षणवृत्तित्वेनापि संयोगा
नां निवेशान्नैषदोष इत्यत आह। तत्पटेति। तथाच लाघवात्तत्पटव्याप्यतादृशयावत्तंतुसंयोगत्वे
नैव तत्पटं प्रतिहेतुत्वसंभवादवच्छेदकतयापि न प्रागभावसिद्धिरिति भावः ननु पटत्वेव तन्निय
तसंख्याविशेषस्याप्युक्तक्रमेणावच्छेदकत्वे विनिगमकाभावात् तल्लघुरपि तत्त्वेनावच्छेदकः किं
तु तत्प्रागभाव एव धर्मिग्राहकप्रमाणेन तथैव तस्य सिद्धेरित्यत आह यावत्त्वेति तथा च तादृशसंयोग
निष्ठयावत्त्वमपेक्षाबुद्धिविशेषविषयत्वमेव तच्चापि सा बुद्धिव्यक्तीनां भेदान्नानोत्पन्नं तत्कार्यकार
णभावकल्पनाप्रयोजकत्वार्थमतिरिक्तप्रागभावस्यावच्छेदकतया कल्पनमिति भावः अत्र वदंति-य

त्र्यक्रमेणातंतूनांतत्संयोगानांवाजननोत्तरंपटस्योत्पादः तत्रप्रागेवपटस्योत्पादवारणार्थंचरमस्यतंतोः त-
त्संयोगस्यवाविशिष्यहेतुतावश्यकत्वेनततएवोदासीनतंतुषुपटस्योत्पत्तिवारणेपियत्रसमस्ततंतु-
ष्वेकदेवोत्पत्तेषुसंयुक्तेषुचपटस्योत्पत्तिस्तत्रतत्पटस्यान्यत्रोत्पादवारणार्थंप्रागभावः कारणतया
कल्प्यतेतत्तत्तंतुसंयोगानांविशिष्यहेतुत्वकल्पनेनतद्वारणेपिगौरवात् नहितत्रापितत्पटोत्प-
त्तेः पूर्वंतत्पटारंभकतत्तंतुषुद्रव्यारंभकसंयोगःयेनतदानींतत्पटस्योत्पादवारणार्थंविशि-
ष्यसंयोगानांहेतुत्वमावश्यकंस्यात् नचतत्पटवत्त्वेनैवतादृशपटंप्रतितंतूनांतादात्म्येनहे-
तुत्वान्नान्यत्रतस्योत्पादइतिवाच्यं कार्यवत्त्वेनकारणतायामन्यथासिद्धेः अन्यथाद्रव्यचाक्षु-
षत्वावच्छिन्नंप्रत्यपिचाक्षुषवत्द्रव्यत्वादिनैवहेतुत्वसंभवेरूपादीनामहेतुतापत्तेः समस्तस्यारंभ-
कतंतुसंयोगनाशान्नष्टस्यापिपटस्यपुनः स्वारंभकतंतुषूत्पत्तिप्रसंगेनतत्स्वारंभकसंयोगानां

विशिष्टतत्वं प्रतिहेतुत्वकल्पने महागौरवापत्तेः अस्माकं तु प्रागभावविरहादेव नष्टस्य पुनर्नोत्पा
दः। यत्तु युगपद्द्रव्यत्वे संयुक्तौ अवयवस्य तन्तुभिर्जनितस्य परस्य प्रत्यक्षोत्पत्तिवारणार्थं तावत्तंतुप
र्याप्ता यावत्त्वत्वारंभकसंयोगसमकालोत्पन्नसंख्याव्यक्तेरेव तत्त्वं प्रति विशिष्य हेतुत्वमुक्तं। ताव
त्तैव तदानीमन्यत्र कालान्तरे वा नावत्तन्तुषु तत्त्वस्योत्पादवारणादिति। तन्न घटः पटस्यैतं तोद्धितीयक्ष
णे एव तत्त्वंतरसंयोगोत्पत्त्यात् तृतीयक्षणे सहस्रतन्तुकपटोत्पत्तिस्तत्रैव तंतो व्यभिचारात्। स
हस्रत्वादिसंख्यायाः समानाधिकरणभावे एकत्वसापेक्षत्वात् पाद्व्योत्पत्तिद्वितीयक्षणे तदसं
भवात्। किंच तादृशसंख्याव्यक्तीनां तत्तद्व्यक्तित्वेन तत्त्वं प्रतिहेतुत्वे ऽनन्तकार्यकारणभावाप
त्तिः तावत्तन्तुपर्याप्ततादृशसंख्यात्वेन हेतुत्वे च महागौरवमतस्तत्त्वं प्रागभावव्यक्तिरेव तत्त्वं
हेतुतया कल्पयितुमुचिता कारणतैव धर्मिग्राहकप्रमाणसिद्धायाः तस्याः पदार्थान्तरेणासा

४६

46

द्ध्विनिगमनाविरहस्यासंभवादितिदिक् । प्रागभावानंगीकारे चतुर्थक्षणवृत्तिध्वंसप्रतियोगिकाया
श्चापेक्षाबुद्धिव्यक्तेस्तृतीयक्षणोत्पत्तौ समवायिनो द्रव्यस्यासमवायिकारणानामेकत्वानां निमित्त
कारणस्यापेक्षाबुद्धेश्चाविशेषात्तद्विदेव तत्तद्वित्रित्वादिकं जायतेति चेन्नेति नियमो नस्या
त् तत्र तावत्तत्तद्वित्वादिप्रागभाववत्त्वावच्छेदेन तत्तत्त्रित्वाद्युत्पत्तिरिति त्रित्वाद्युत्पत्तिनियामक
तयैव प्रागभावसिद्धिरित्याचार्यमतं दूषयति एतेनेति । कस्यचित्समवायिनस्तन्निष्ठैकत्वस्य वाऽ
पत्तिरशायामपि तत्तत्त्रित्वाद्युत्पत्तिप्रसंगेन चरमस्य समवायिनस्तदेकत्वस्य वा तत्र विशिष्य हेतुताप्रोक्ते
तद्विरहदिवान्यत्र तत्त्रित्वाद्युत्पत्तिसंभवे प्रागभावविभानाभाविनेत्यर्थः । द्वित्वस्थलेऽतिरिक्तप्रागभावम
धर्मिणस्तत्रानन्यथासिद्धत्वनियतपूर्ववर्तित्वयोः कल्पनामपेक्ष्यासमवायिनश्चरमैकत्वस्यैव कानन्य
था सिद्धत्वकल्पनं लघीय इति द्वित्वानुरोधात्र प्रागभावः सिध्यतीत्यतस्त्रित्वपर्यन्तानुसरणं । केचित्तु त

त्वज्ञानिनः शुकादेः सत्यामपि विहितनिषिद्धक्रियायां धर्माधर्मयोरनुत्पादात् तज्जनकतया तत्त्वज्ञा
नप्रागभावः सिध्यतीति न वाच्यं तत्त्वज्ञानेतादृशज्ञानान्तरं प्रागभावसत्त्वात्तदानीं धर्माद्युत्पत्ति
प्रसंगः समानकालावच्छिन्नैकात्मवृत्तित्वसंबंधेन तत्त्वज्ञानशून्यत्वेन प्रागभावस्य विशेषणीयत्वा
त् नन्वेवं निरुक्तप्रत्यासत्त्या न तत्त्वज्ञानभावविशिष्टप्रागभावत्वेनैव हेतुत्वमुपेयं तत्त्वधीप्रागभावत्व
प्रवेशे गौरवात् तथा चाघ तत्त्वज्ञानकालीनत्वेन गुणान्तरप्रागभावानामपि हेतुत्वापत्तिरिति वाच्यं·
तादृशरूपेण हेतुतायामिष्टत्वात् न वा तत्क्रमेण तत्त्वधीप्रागभावस्य हेतुतामपेक्ष्य लाघवात्मिथ्या
ज्ञानवासनायाः एव धर्मादिहेतुत्वमुक्तमिति वाच्यं· आत्मधर्मिकगौरवस्य तुल्यत्वात् द्विप्रकारक
त्वेन हेतुताया मिथ्याज्ञानवासनात्वस्य नात्वेन गुरुत्वेन च तादृशेण धर्माघजनकत्वात् न चोक्त
क्रमेण तत्त्वज्ञानत्वमथात्मधर्मिकदेहात्मत्वादिप्रकारकत्वमेवेति तदवच्छिन्नशून्यप्रागभा

४७
47

वत्वेनापि हेतुत्वेऽनुगमो गौरवं चेति वाच्यं मानसत्वव्याप्यमुक्तिजनकतावच्छेदकवैजात्यस्यैव तत्वज्ञा
नपदेनोपलक्षणात् । न च मिथ्याज्ञानवासनाया अपि धर्मादिजनकत्वं भावनात्वव्याप्यवैजात्यविशे
षेणैवं च व्यभिचारो न गौरवमिति वाच्यं मिथ्याज्ञानोत्तरं तादृशवासनोत्पत्तिदशायामपि धर्माद्युत्पा
दाद्भावनात्वव्याप्यवैजात्येन हेतुत्वासंभवात् इति प्राहुः । तेषां धर्माधर्मोत्पादनियामकत्वेन वस्त्वं
तरसिद्धावपि तत्र तत्वज्ञानप्रागभावत्वसंदेहप्रमाणमनुचिंतनीयं । ननूक्तक्रमेण सिद्धस्यापि प्रा
गभावस्य प्रतियोगिहेतुनागतमित्यत आह वर्णायं व्याप्यवृत्तेरिति द्वितीयलक्षणादित्युत्पत्तिवारणा
येत्यत्र यः । तथा चाग्रावच्छेदेनोत्पन्नायाः संयोगव्यक्तेर्द्वितीयादिक्षणे पुनरुत्पादः स्यात् मूलावच्छे
देन तदभावस्य सत्वात् कार्यस्य प्रतिबंधकत्वासंभवात् । अग्रावच्छिन्नतत्तत्संयोगं प्रत्यग्रावच्छिन्न
त्वविशिष्टतत्तत्संयोगाभावत्वेन हेतुतायां गौरवात् तत्तत्संयोगं प्रति तत्तत्संयोगप्रागभावत्वेव हेतु

राम
४६

नै

त्वयुक्तमिति भावः। ननु घटादिसंयोगमात्रं प्रत्येव समानावच्छेदकत्वप्रत्यासत्त्या घटादिसंयोगसामान्याभा
वस्य हेतुत्वं वाच्यमतो न गौरवं न चैवमपि प्रत्यक्षसिद्धं प्रागभावमादाय विनिगमनाविरहः। न च घ
टसंयोगप्रागभावत्वेन हेतुत्वे घटीयसंयोगांतरप्रागभावमादायैवोत्पन्नस्य तस्यापि पुनः प्रसंगात्
। तत्तद्घटसंयोगव्यक्तौ तत्तत्संयोगप्रागभावत्वेन हेतुत्वे वानंतकार्यकारणभावापत्तेः। गौरव
स्यैव विनिगमकत्वादिति पत्त आह धारावाहने इति। अनुत्पन्नतत्संयोगात्यंताभावस्यैव निरवच्छिन्नवि
शेषणतयैव तत्तत्संयोगं प्रति हेतुत्वं वाच्यं अतः स्थानांतरमनुसरति धारावाहनेनेत्यप्याहुः
धारावाहने तु तत्त्वाजनकीभूतात्मनःसंयोगाद्यव्यक्तीनां चतुर्थक्षणे सत्त्वमावेदितं। तेन तत्का
रणव्यक्त्यभावप्रयुक्तायाः कार्यानुत्पत्तेर्नावसरः। एवं विकल्पकस्य स्वकारणीभूततद्वि
शेषणज्ञानव्यक्त्यभावादेव चतुर्थक्षणेनोत्पादः संभवतीत्यतो निर्विकल्पकपर्यंतानुसर

५८

48

णं आंशिकनिर्विकल्पकस्यापि विशेषणज्ञानसापेक्षत्वात् प्राथमिके तितेन सप्रकारकान्यज्ञानला
मः द्वितीयतृतीयक्षणयोः स्वात्मककार्येण प्रतिबंधसंभवात् चतुर्थक्षण इत्युक्तं न च तन्निर्वि
कल्पकं प्रतितत्समानकालोत्पन्नध्वंसविशेषस्यैव प्रतिबंधकत्वं तदुत्पत्तिकालपर्यंतस्थायि
द्वित्वविशेषस्य वा जनकत्वमस्तु न तु कापि भावस्यानंतरज्ञानाभावस्य च द्वयोर्हेतुत्वमतो नं गौ
रवमिति वाच्यं तादृशध्वंसानां द्वित्वादीनां च बहूनां विनिगमनाभावेन तथा कल्पनासंभव स्य
लाघवेनैकस्यैव तन्निर्विकल्पकप्रागभावस्य तन्निर्विकल्पकहेतुत्वेन कल्पनार्हत्वात् अतीं
द्रियस्य निर्विकल्पकस्य प्रागभावस्य प्रमाणांतरासिद्धतया तेन साद्धं निगमकाभावस्य च कु
मशक्यत्वादिति भावः। ननु तत्तत्संयोगं प्रति तत्तत्संयोगप्रागभावस्य लाघवेन हेतुत्वसिद्धाव
पि मूलावच्छेदेन जायमानः श्येनसंयोगः कुतो ग्रावच्छेदेन न जायते स्वरूपसंबंधेन तत्तत्प्राग

मावस्योभयावच्छेदेनाप्यविशिष्टत्वात् अत आह स्वभावेत्यादि। तथा च प्रागभावस्यावच्छिन्नवृत्तित्वे
वसंयोगस्यावच्छिन्नवृत्तितानियामिकासमानावच्छेदकत्वप्रत्यासत्त्यैव तत्स्वप्रतियोगिहेतुत्वा
दितिभावः। अत्र कस्यचित्तरत्वेन साधारणप्रत्यक्षस्यासत्त्वमावेदितं। वर्णपंक्तीत्यनेन च निर्विक
ल्पकसामान्यं प्रतितत्तानवप्रतिबंधकत्वकल्पनया तच्चतुर्थक्षणे पुनर्निर्विकल्पकासंभवात्
तस्य वर्णद्वयरणागस्य वा भावद्वयं तत्र कारणं न वाच्यमित्यस्वरसः सूचितः। ननु संख्याविशे
षाणामिति सहस्रतन्तुकपटादौ चरमतन्तुसंयोगोत्पत्तिकालीनस्य सहस्रत्वादिसंख्या
विशेषस्यैवानतः परमेश्वरीयापेक्षाबुद्धिजन्यस्य समानाधिकरणप्रत्यासत्त्या हेतुत्वान्नोका
रणवस्त्वानधिकरणतन्तुषु तत्पटस्यानुत्पादप्रसंगं इवेयीत्यर्थः। पद्यन्ते नो द्वितीयक्षणे एव तन्त्वं तत्सं
योगोत्पत्त्या तृतीयक्षणे सहस्रतन्तुकपटोत्पत्तिस्तत्रैवं तेनो व्यभिचारात् सहस्रत्वादिसंख्याया

४९

59

हेतुत्वमसंभावितं एकत्वान्यसंख्यामात्रस्यैव समानाधिकरण्यावच्छेदकत्वसापेक्षत्वतयाद्रव्योत्पत्तिद्वि
तीयक्षणे तदसंभवात् पुरुषकालभेदेन सहस्रत्वादीनामनंतत्वेनानंतकार्यकारणभावायत्ति
गौरवं चेति द्रव्योत्पादनियामकत्वेनापि प्रागभावः कल्पयितुमुचित एवेत्याशयेनोक्तं संभवे पी।
ति-कर्मोत्पन्नस्थले कस्याश्चित्साम्यावयवव्यक्तेस्तदेकत्वस्य वानुत्पत्तिदशायामपि कारणांतर
सत्वमादाय प्रागभाववादिनामपि त्रित्वोत्पत्तिप्रसंगात्-उत्पत्स्यमानसमवायिव्यक्तेस्तदेक
त्वस्य वा विशिष्य हेतुतायां चैव प्रागभावकल्पने बाधकमतो युगपदुत्पन्नपर्यंतानुसरणं-पूर्वोक्त
युक्त्या द्वित्वोत्पादनियामकत्वेन प्रागभावासिद्धेः द्वित्रित्वादीति-नियामकत्वेनेति-अन्यथा
युगपदुत्पन्ननिष्ठत्रित्वादेः स्वानधिकरणेष्वपि द्रव्येषु उत्पत्तिप्रसंगात्-न चापेक्षाबुद्धिव्यक्तेरेवि
शिष्यहेतुत्वान्नातिप्रसंगः स्वानाश्रयमादाय त्र्यपेक्षाबुद्धेरपि त्रित्वजनकत्वदर्शनात्-नचनत्तद्धा।

व

क्तिनिष्ठैकत्वान्यसंख्यासामान्यं प्रति तत्तद्व्यक्तिनिष्ठविनाश्यत्वसंबंधेनैकत्वप्रकारकनिश्चय
त्वेनैवापेक्षाबुद्धेर्जनकत्वप्रकारांतरेणानुगमासंभवात् तथा च तत्तदेवैकनिष्ठत्रित्वादेरन्यत्र
द्रव्येऽनुत्पत्तिसंभव इति वाच्यं पुरुषत्रयाणां घटादिविभिन्नद्रव्यधर्मिकैकत्वज्ञानत्रयादपि
तेषु त्रित्वोत्पत्तिप्रसंगे नापेक्षाबुद्धेस्तद्रूपेण हेतुत्वादिति भावः। अस्मे त्रित्वस्वरसबीजं
तु द्रव्यांतरकर्मानस्यैकनिष्ठसंयोगादेरन्यत्रोत्पत्तिवारणार्थमवश्यं तत्तद्द्रव्यसमवेतकार्यत्वा
वच्छिन्नं प्रति तत्तद्द्रव्यत्वेन हेतुत्वं वाच्यं अतस्तदन्यतादिवान्यत्र तदीयत्रित्वाद्युत्पादः। किं तत्त
त्रित्वाद्यंतर्भावेणानंतप्रागभाव हेतुत्वे न च कार्यत्वस्य च कालिकसंबंधेन घटत्वपरत्वादिम
त्वस्यापि विनिगमनाविरहेण कार्यतावच्छेदकेऽनुप्रवेशादनंतकार्यकारणभावावश्यकत्वमिति
वाच्यं समवेतत्वकालिकोभयसंबंधेन तत्तद्द्रव्यवत्त्वावच्छिन्नं प्रत्येव तत्तद्द्रव्यत्वेन हेतुत्वस्यात्त

५० त्वात्। नित्यवृत्तिधर्मस्यापि जन्यतावच्छेदकत्वपक्षे तत्तद्व्यक्तिसमवेतत्वावच्छिन्नं प्रत्येव तत्तद्व्यक्तित्वे
नहेतुत्वसंभवाच्चेति द्रष्टव्यं। निश्चोक्तं सामान्यप्रत्यासत्तेर्युक्त्यंतरमुपन्यस्य दूषयति। यद्वित्यादि।
ज्ञानेच्छेति। ज्ञानेच्छे पारिभाषिक्यौ कृत्योश्चेत्यर्थः। तदुपस्थितिमिति। इच्छोपधायकज्ञानस्य कृत्युपधा
यकेच्छायाश्चोपस्थितिं विनेत्यर्थः। न चेति। इच्छाकाले ज्ञानस्य कृतिकाले चेच्छाया नसाक्षात्को
रत्यर्थः। ज्ञानसंस्कारयोरेकदोत्पादादाद्योग्यत्वमुक्तं। योग्यत्वं च वेगावृत्तित्वसत्ताजातिमत्वं। ते। न
निर्विकल्पकद्वयस्यापि नैकदोत्पत्तिः। इत्थं च ज्ञानसंयोगयोरुक्तयोग्यतावतोर्यौगपद्येन व्यभि
चारः स्यादत उक्तं विशेषेति रूपरसयोर्योग्यविशेषगुणयोर्घटादौ युगपदुत्पादादुक्तमात्मनीति।
विभिन्नावच्छेदेन सुखदुःखपर्यायोगपद्यस्वीकारे एकावच्छेदेनेति पूरणीयं। केचित्तु। विशेषगु
णपदं स्वविषयकविशेषगुणपरं वाच्यं। एवं चात्मपदं शरीरार्थकं। तेन कापद्यहृदशापांसोभरि ५०

प्रसक्ते कर्णशरीरावच्छेदेन ज्ञानादियोगपद्येपि न क्षतिरित्याहुः द्राक्षादिजनकेति। इच्छाद्युपधायकत्वर्थः
ननु ज्ञानादाविच्छादेः स्वरूपयोग्यत्वस्य फलोपधायकत्वस्य वा सहार्थे ज्ञानत्वादिसामान्यघटितासत्तिर
भ्युपगमे: तत्र नाघटत्वाद्द्वेषो वापर्येत्यादिना ग्रहासंभवादित्यवश्याभ्युपेयत्वादित्यत्र हेतुः इच्छाकृ
तीति। इच्छानुत्पादस्थले ज्ञानस्य कृत्यनुत्पादस्थले च इच्छायाः साक्षात्कारादित्यर्थः मनसेति। कार
णत्वनिविष्टसमस्तवस्तूपस्थितावित्यादिः तथा च फलानुपधायके एव ज्ञानादाविच्छादिस्वरू
पयोग्यत्वस्यान्वयव्यतिरेकाभ्यां मनसा ग्रहसंभवादिच्छाफलोपधायकज्ञानादिव्यक्तीनामनुपस्थि
तावपि न क्षतिरिति भावः। द्वितीयमभिप्रेत्याह कृत्यनुत्पादस्थल इति। ज्ञानेच्छयोः समूहालंबनसा
क्षात्कारस्य संभवात् इति योजना। न चेच्छान्तरं ज्ञानस्य न साक्षात्कारः कार्यसहभावेन विषयस्य हेतुत्वा
दिति वाच्यं। अनुमित्याद्युत्तरमपि परामर्शादेरनुव्यवसायोत्सर्वत्र विषयस्य तथा हेतुताभावात्तन

चेष्टासाधारणज्ञानत्वांशे निर्विकल्पकतया जनकतावच्छेदकरूपेण फलोपधायकव्यक्तिग्रहासं
भवात्तद्दोषस्तदवस्थ इति वाच्यं । अभावत्वादेरिव ज्ञानत्वादेः सविकल्पकैकवेद्यत्वान्निर्विकल्पो
त्पत्तिर्मोपनायकस्य ज्ञानत्वविशिष्टज्ञानबोधस्यासंभवाच्चेति भावः । नन्वेवमपि ज्ञानस्य कृत्युपधायक
त्वग्रहः सामान्यप्रत्यासत्तिं विना दुर्घटः कृतिपर्यन्तफलोपधायकज्ञानव्यक्तिकालेन तदुत्तरं तद्ग्रहा
संभवादत आह स्मरणेनेति । तथा चेदं स्मरणं ज्ञानजन्यं स्मृतित्वादिति क्रमेण पक्षधर्मतावलात्
कृतिफलोपधायकज्ञानव्यक्तिमनुमापय्यानन्तरं कृतिकारणत्वग्रहः करणीय इति भावः । न
नुपक्षोपि ज्ञानात्मकेन न कृतिर्जनिता तत्र तेन स्मरणानुत्पादान्न स्मृत्या तदनुमानमसंभवीत्यत आ
ह विंशतीति । व्यासंगानुरोधात् ज्ञानयोरण्वनियोगपद्येनैव्यानेन तु विशेषणमात्रस्येत्याशयं न चै
क एव प्रयत्नः तत्र विंशत्यंगुल्यवच्छेदेनोत्पद्यत इति वाच्यं । अंगुलीचेष्टानां तारतम्यस्यानुभवेनवै

लक्ष्यतायस्यावच्छेदकत्वादिति भावः। नन्विदं गोपदशक्यतावच्छेदकं गोत्वादि तत्र तादात्म्येनायं सास्ना
वान् गोत्वादि तत्र च समवायेन गोत्वंहितो गवेतरावृत्तित्वविशिष्टसकलगोवृत्तिस्वरूपस्य गोत्व
स्य व्याप्यतावच्छेदकतया तदन्तर्गतसकलगोग्रहार्थं सामान्यप्रत्यासत्तिरावश्यकीति प्रागल्भमतं नि
रस्य गोत्वे वेति। गोपदशक्यतावच्छेदकत्वस्य साध्यतायां समवेतत्वविशिष्टगवेतरासमवेतमात्रं
गोरूपादौ व्यभिचारी तत्र गोनिष्ठत्यादि। गोनिष्ठाभावस्य गोवृत्त्यन्योन्याभावस्य प्र
तियोगित्वं येन तदन्यत्वमित्यर्थस्तस्य गोनिष्ठान्योन्याभावप्रतियोगितावच्छेदकान्यत्वे सतीत्यर्थः
तेन गोत्वस्यापि गोनिष्ठविशिष्टाभावादिप्रतियोगित्वेपि तद्धेतुत्वप्रसिद्धिः। अवच्छेदकत्वं तु किंचि
त्धर्मानवच्छिन्नं समवायसंबंधावच्छिन्नं यथात्वमतो नोक्तदोषतादवस्थ्यं: गगनादौ व्यभि
चारवारणार्थमाह समवेतत्वेन चेति। सास्नादिः साध्यतायां गवेतरासमवेतमात्रसमवेतसमवायेन हे

तुल्यसमत्वादाह अविशेषितं तिन्त्विति। न तु तत्तदंतं गोव्यक्तिवृत्तित्वविशिषितमित्यर्थः अग्रा
ह्यत्वादिति। तत्तद्व्यक्तित्वेनानंतगोव्यक्तीनामेकदानुपस्थितेरिति भावः। नैयायिकः शंकते स्या
देतदिति। एतद्दूषणं स्यादित्यर्थः। समानेति रजतत्वावच्छिन्नधर्मिताकेष्टसाधनताज्ञानत्वेन समव्या
प्तत्वात् सत्यरजतत्वप्रकारकेच्छांप्रति योजकत्वेइत्यर्थः रजतत्वप्रकारकेच्छासामान्यंप्रति त्वत्का
रकज्ञानत्वेन हेतुतायां मानाभावेन यथाश्रुतासंगतेः। रजतानयनत्वादिप्रकारकप्रवृत्तिप्रत्येव
रजतत्वादिप्रकारकत्वेनोपादानप्रसक्तस्याह इष्टत्वादिति ध्येयं। रजतत्वादिपदं स्वत्वादेरुपलक्षकं सु
त्वादेः स्वतःप्रयोजनतया समानप्रकारकत्वेनैव तत्तज्ज्ञाने इच्छा कारणत्वकार्यत्वसंभवादित्यपि क
श्चित्। नच स्वस्वतोपद्धर्मिकेष्टसाधनताज्ञानं तत्रैव पदस्भावे दूषणं तत्रापरइच्छा जायते इति सर्वत्र फला
नगोचरेच्छायां नेष्टसाधनताज्ञानापेक्षेति स्वयमेव बौद्धपिकारैरव्यवस्थापितं तथा च पत्रविनश्यद

वच्छेनैव रजताभाववद्धर्मिकद्वेषसाधनताज्ञानेन रजताभावे द्वेषो जनितस्तत्रोत्तरकालमज्ञाते पि र
जते रजतत्वप्रकारेणेच्छापत्तिरतः सामान्यतो रजतत्वप्रकारकेच्छायां रजतत्वप्रकारकज्ञानत्वेन हेतु
त्वातरमावश्यकं अतः समानप्रकारतामात्रस्य तन्त्रतादिकं यथाश्रुतमेव सम्यगिति प्रतीमः। क्वचिदेव
ति रजतत्ववत्तया निश्चिते धर्मिणीत्यर्थः क्वचिद्धीन रजतत्वासंसर्गके घटादौ स्यादिति तथा च रज
तत्वप्रकारकज्ञानादृष्टादेरपि तत्त्वेन नु तत्स्वरूपीयरजतत्वप्रकारकेच्छासामान्यं प्रत्येव तत्स्वरूपीय
रजतत्वावच्छिन्नधर्मिकेष्टसाधनताज्ञानात्वेन हेतुत्वं तत्र च कार्यस्य विशेष्यत्वं कारणस्य तु स्वप्र
कारीभूतरजतत्वाश्रयत्वं प्रत्यासत्तिरतो घटादौ न रजतत्वप्रकारकेच्छेत्यत आह तादृशप्रकारेति क
थमिति तथा च शुक्त्यादिधर्मिकरजतत्वप्रकारकेच्छायां व्यभिचारादुक्तक्रमेण हेतुत्वं न सम्भव
तीति भावः ननु तद्धर्मिकरजतत्वप्रकारकेच्छायां तद्धर्मिकरजतत्वासंसर्गग्रहस्याभावो पि हेतु

५३

53

वाच्यः इति इच्छायां न विशेष्यानियमः न च गुरुत्वं रजतधर्मिकरजतत्वासंसर्गग्रहस्याप्रसिद्ध्या रजत
त्वप्रकारेण तदिच्छा न स्यात् कारणवाधादिति वाच्यं रजतान्यधर्मिकेच्छामते उक्तक्रमेणाहेतुत्वो
पगमात् रजतत्वसंसर्गज्ञानाकांक्षात तत्तद्धर्मिज्ञानाभावस्यैव वा हेतुत्वादत्र आह अनुपस्थि
त इति तथा च मन्त्र घटादौ रजतत्वस्यासंसर्गग्रहस्तत्र रजतत्वप्रकारकेच्छानुत्पादेपि अनुपस्थि
तपदार्थवस्तुषु तादृशेच्छोदयात्तेषु रजतत्वासंसर्गज्ञानविरहस्य स्वतःसिद्धत्वादिति भावः ए
कधर्मिकरजतत्वप्रकारकज्ञानदशायां मन्त्र यत्र रजतत्वासंसर्गज्ञानस्य विरहः तेषु मा विधिवा
ज्ञानेष्वपि ज्ञापकतयैव रजतत्वप्रकारकेच्छेति पादेऽनुपात्तदाहवस्तुत इति नियामकत्वमिति
कारणतावच्छेदकीभूय इत्यादिः इच्छायां धर्मिनियमार्थं तत्तद्धर्मिविशेष्यकरजतत्वप्रकारकेच्छा
यां तत्तद्धर्मिकरजतत्वासंसर्गज्ञानाभावत्वेन कारणत्वमेव स्यात तत्तद्धर्मिकेच्छायां तत्तद्धर्मिकेष्व

५३

साधनताज्ञानत्वेनैव लाघवाद्धेतुत्वं युक्तमित्यर्थः तथा च भाविरजतधर्मिकेच्छाजनतगार्थमव
श्यं वेत्तृणीयस्य भाविरजतधर्मिकज्ञानस्य प्रकारांतरेणासंभवादवश्यं सामान्यलक्षणोका
च्येति निगर्वः ननु एवं द्रव्यत्वेन रजतधर्मिकेष्टसाधनताज्ञानादपि रजतत्वप्रकारेणेच्छा
स्यादत आह मान्यतश्चेति संवादिविसंवादीच्छासाधारणेनेत्यर्थः तदिच्छायां तद्विषयकेच्छायां
तत्प्रकारकत्वमिति तथा च रजतत्वप्रकारेण तत्तद्धर्मिकेष्टसाधनताज्ञानत्वेन रजतत्वप्रकार
कतत्तद्धर्मिकेच्छां प्रति हेतुत्वान्नातिप्रसंग इति भावः ननु एवं संवादीच्छास्थले एव तत्तदनंतरजत
धर्मितं भावेनानंतकार्यकारणभावापत्तिरत सामान्यतो रजतधर्मिकरजतत्वप्रकारकेच्छा हेतु
त्वान्नातिप्रसंग इति यां रजतत्वप्रकारेण रजतधर्मिकेष्टसाधनताज्ञानत्वेन हेतुत्वमस्तु तथा चातीत
जनगोचरज्ञानादेव भाविरजतव्यक्ताविच्छासंभवात् इतं सामान्यलक्षणापाविसंवादीच्छास्थलेषु

५८

तत्तद्धर्मेतरभविएणानंतकार्यकारणभावो। नन्वगत्यैव सर्वैरप्युपेयत इत्यस्वरसादाह वस्तुतस्त्विति:
तथाच धर्मिमात्रस्याप्रवेशेनातिलाघवात्तत्तत्पुरुषीयरजतत्वप्रकारकेच्छायां तदीयरजतत्वा
वच्छिन्नविशेष्यताकेष्टसाधनताज्ञानत्वेनैव हेतुत्वमस्तु समानविशेष्यताया: प्रत्यासत्तित्वादि
वैकधर्मिकज्ञानादन्यधर्मिकेच्छानुत्पत्ति: संभवादित्यकामेनापि सामान्यलक्षणांगीकार्यतावि
नाभाविरजतमादिज्ञानासंभवेन तत्रेच्छानुत्पत्तिप्रसंगादित्याशय: नचात्राप्यनंतपुरुषांतर्भावा
दनंतकार्यकारणभावप्रतादवस्थ्यमिति वाच्यं रजतत्वप्रकारेणातत्तत्पुरुषधर्मिकविसंवादी
च्छानुरोधेन विषयविधया पुरुषव्यक्तीनां निवेशस्यापूर्वकत्वेप्यावश्यकत्वादिति भाव: सामाना
धिकरण्यमिवेति परमते दृष्टांत: तथाच समानप्रकारतामात्रेण हेतुताकादिभि: परैरपि कस्यापु
सो ज्ञानादन्यस्येच्छोत्पादवारणार्थं सामानाधिकरण्यप्रत्यासत्तिरुच्यते तथैवास्माभिरव्येधर्मि ५८

कज्ञानादन्यधर्मिकेच्छोत्पत्तिवारणार्थं समानविशेष्यत्वं प्रत्यासत्तिः स्वीकृतेति भावः प्राञ्चस्तु
।रजतत्वप्रकारकेच्छासामान्यं प्रति वरजतत्वावच्छिन्नधर्मिकेष्टसाधनताज्ञानत्वेन हेतुत्वं त
न्नैवैकस्य पुंसः रजतत्वप्रकारेणज्ञानादन्यस्यतादृशेच्छापत्त्यापधा सामानाधिकरण्येन प्रत्या
सत्तिः तच्चैकधर्मिकज्ञानादन्यधर्मिकेच्छोत्पत्तिप्रसंगेन समानविशेष्यत्वमपीति यथाश्रु
तार्थमेवयं थार्थमादृउनन्न ॰समानविशेष्यत्वप्रत्यासत्त्याहेतुतायां तत्पुरुषीयत्वस्यावश्यं निवे
शनीयत्वाद् न्यथा रजतत्वेन रजतधर्मिकेष्टसाधनताज्ञानवतोपि पुंसः शुक्तिधर्मिकरजत
त्वप्रकारकेच्छोत्पत्तिप्रसंगात् पुरुषान्तरीयरजतत्वप्रकारकज्ञानस्य विशेष्यतासंबंधेन शु
क्तौ सत्त्वादिति दिक् । स्वत्वस्यानुगतत्वे रजतत्वप्रकारकेच्छासामान्यं प्रति स्वसमानविशेष्य
करजतत्वप्रकारकज्ञानत्वेन हेतुत्वं प्राञ्चैरुक्तमपि स्वस्य कविशेष्यनियमार्थं अस्य संसर्गादिः

५५

कारणत्वांतरकल्पनामपेक्ष्य लाघवादित्याह असंसर्गाग्रहादेरिति । आदिना भेदाग्रह व्यावर्त्तक
धर्माग्रहादेः परिग्रहः समानविषयत्वस्य स्वसमानविशेष्यकत्वस्य निवेशोपीत्यपिनाननुगता
नतिप्रसक्तं स्वत्वमेव दुर्वचमित्यस्वरसः सूचितः ननु यथार्थरजतत्वप्रकारकेच्छात्वावच्छि
न्नप्रतिदोषाभावविशिष्टस्यरजतत्वासंसर्गाग्रहस्य हेतुत्वाद्रजतत्वप्रकारकेच्छासामान्यं
प्रत्यपि रजतत्वासंसर्गाग्रहोऽवश्यं हेतुः पीठविशेषयोरिति न्यायात् तत्कुतः कारणतामपेक्ष्ये
त्युक्तमत आह कारणेति । कार्यस्येच्छादेः तथाच यथार्थेच्छादिकं प्रत्यपि यथार्थज्ञानादेरेव स
मानविशेष्यत्वप्रत्यासत्त्या हेतुत्वाद्विशेषतोप्यसंसर्गाग्रहस्य हेतुत्वमसिद्धमिति भावः । एते
न समानविशेष्यत्वप्रत्यासत्त्यैवातिप्रसंगभंगेन निरस्तमित्यग्रेऽन्वयः । तत्प्रकारकत्वानमिति
तत्प्रकारेणोपस्थापकतानमित्यर्थः हेतुरिति परेणान्वयः तस्यां इच्छायां इदं रजतमिति भ

55

५५

माछुक्त्यादौयथार्थज्ञानप्रसंगादाहदोषाभावसहितमिति:। शुक्त्यादौरजतभेदग्रहेतद्धर्मिकवि
संवादीज्ञानानुत्पत्तेराह विसंवादिमां शुक्तौ विसंवादीज्ञानं स्यात् इति वाच्यं। विसंवादिरजतत्वप्र
कारकेज्ञानत्वेन जन्यतारजतभेदप्रकारत्वानिरूपितारजतधर्मिताकज्ञानत्वेन हेतुत्वं समान
विशेष्यत्वं प्रत्यासत्तिरित्यत्र तात्पर्यात्। अथान्यथाख्यातिमनंगीकुर्वतामस्माकं कूटलिंगजनि
तादिदं रजतमित्याकारज्ञानद्वयादपि यथार्थरजतज्ञानस्यादात्तत्र यथार्थरजतत्वप्रकारकज्ञा
नत्वेन हेतुत्वं दुर्घटमत आह तद्विशेषेति। उपस्थितं यद्रजतं तद्धर्मिकरजतभेदग्रहाभा
वस्य सत्त्वात्। नचैवमेकत्र रजतभेदग्रहेऽपि रजतान्तरे संवादिनीज्ञानं स्यात् रजतधर्मिकभेदग्रह
सत्त्वादिति वाच्यं। संवादिरजतत्वप्रकारकेज्ञानत्वेन कार्यत्वं रजतभेदप्रकारत्वानिरूपितरजतध
र्मिताकज्ञानत्वेन रजतभेदनिराकारोऽरजतधर्मिताज्ञानत्वेन रजतत्वसाकारोऽरजतधर्मिता

५६

56

कज्ञानत्वेन वा हेतुत्वं समानविशेष्यताच प्रत्यासत्तिरित्यत्रतात्पर्यात् । आकांक्षा च परेषां पदार्थांत
रं कश्चित्तज्ञानद्वयस्थलेपि न रजत एव नेदं रजतमिति भ्रमात्मकज्ञानद्वयादपि न संवादिनी प्र
वृत्त्याकूतलिंगकपरामर्शोत्तरोत्पन्नस्य प्रमास्थले नाभिषिक्तस्येदं रजतमिति ज्ञानद्वयस्योत्तरं संवा
दिनी प्रवृत्तिरिति ध्येयं । हेतुत्वमिति प्रयोजकत्वमित्यर्थः । तेन भेदाग्रहस्य कारणतावच्छेदक
त्वेपि न क्षतिः । औचित्यादिति । अन्यथा ख्यातिवादिनं प्रत्यस्माकं लाघवाद्विशिष्टज्ञानमेव हे
तुरित्याशयः । औचित्ये हेतुमाह दोषाणामित्यादि । अभावमपेक्ष्येति । न च भेदाग्रहस्यैव भेदव्या
प्यवत्ताग्रहाणां भेदावच्छेदकधर्मवत्ताग्रहाणां चाभावस्य हेतुत्वोपाः कल्पनीयत्वोक्तावपि गौ
रवं समानमिति वाच्यं । संवादिरजते इदं इति रजतत्वसाकांक्षारजतधर्मिताकज्ञानत्वेन हेतुत्व
मित्युक्तचरमकल्पे भेदव्याप्यवत्ताग्रहस्य हेतुत्वाभावेपि हान्यभावादिति भावः सिद्ध इति ः

५६

उत्पन्नइत्यर्थः सुखंकदापिविच्छिन्नस्यादितिमूलश्रवणादाह सुखइति-ननूत्पन्नसुखेसिद्धत्वनिर्ण
येनप्रतिबंधात्कथमिच्छाप्रवृत्तामतआह लाघवादिति-तज्जन्यधर्मिकेच्छायांतज्जन्यधर्मिकसिद्धत्वनि
श्चयत्वेनप्रतिबंधकत्वेधर्मिभेदेनगौरवात्इत्यर्थः तत्प्रकारकेच्छायामिति-तद्धर्मीविशिष्टोद्देश्य
ताकेच्छायामित्यर्थः तेनसुखत्वावच्छेदेनसिद्धत्वग्रहेपिसुखहेतुप्रयोजनायत्नामित्यादेः सुखत्ववि
प्रकारकेच्छापाउत्पादः तत्रेच्छायांतादृशपरत्वविशिष्टस्वीयोद्देश्यतयाविषयतात्तदुद्देश्यत्वंपुन
रिच्छामित्यपाअनुभवसाक्षिकोविषयताविशेषः सुखविशेष्यतानिरूपिततत्प्रकारकेच्छाया
मित्यर्थः कारणान्तरोदोषइति-ननुतर्हिसुखत्वावच्छेदेनसिद्धत्वग्रहेप्याह सुखीस्यामित्याका
रकेच्छाप्रसंगात्-आत्मत्वावच्छेदेनसिद्धत्वनिश्चयदशायांअह सुखीस्यामितीच्छानुत्पादप्रसंगा
च्चेतिध्येयंतत्प्रकारकसिद्धत्वनिश्चयमात्रस्यविरोधित्वसिद्धेः सुखत्वंचात्मगुणत्वादिसमूहा

५७

57

त्वं चेनेपि सुखं जायतामितीच्छा न स्यादत उक्तं तदवच्छेदेनेति । तद्धर्मावच्छिन्नविशेष्यताकेत्यर्थः अवच्छेद
कत्वं तु विशेष्यकोटिप्रविष्टतामात्रेणाग्रात्वं तेन सुखं सिद्ध्यत्वित्याकारकस्येव भोजनासुखं सिद्धमित्या-
कारकस्यापि निश्चयस्य सत्वे सुखं जायतामितीच्छा यातो त्वादेः अत एव प्रीत्या धनलाभे धनमात्रार्थि
नो नेच्छा किं तु प्रतियद्धाघधीन धनार्थिन एव यत्किंचिद्विशेषसिद्धौ सामान्येच्छाविच्छेदादिति
शब्दमणावप्युक्तं चैवं सुखसामान्यं सिद्धमित्येवं सुखत्वावच्छेदकतामंतर्भाव्य निश्चयेपि भो
सुखं जायतामितीच्छाप्रसंगः तादृशसुखत्वावच्छिन्ने सिद्धत्वनिश्चयादिति वाच्यं । तस्यापि स्वातंत्र्येणाता
दृशेच्छाविरोधित्वादिति भावः ज्ञानमिति । निश्चय इत्यर्थः नचेत्यादि तत्सुखत्वावच्छेदेन सिद्धत्व
ज्ञानं प्रकृते सुखत्वप्रकारकेच्छास्थलेनेत्यर्थः वस्तुतः सुखेषु तत्तद्व्यक्तित्वेनैव सिद्धत्वनिश्चया-
त्सुखत्वमंतर्भाव्य तत्सुखं सिद्धमित्याकारनिश्चयसत्वेन सुखांतरत्वप्रकारेणैव तत्रेच्छेति भावः नतु

दृष्टासामान्यप्रत्ते वसमानविशेष्यत्वप्रत्यासत्त्यासिद्धत्वनिश्चयस्यप्रतिबंधकत्वं ततदनंतवर्मितावच्छेदकान
र्भावेण तथात्वेगौरवात्तत्कुनःसिद्धसुखादावि छेत्यत आह कथमिति अन्यथा तत्तद्धर्मानंतर्भावे
ण विशेषित्वेनैपापि कः शंकते अथेति यपितत्तत्अप्रामाण्यज्ञानाभाव विशिष्टसिद्धत्वनिश्चयाभा
वत्वेतुत्वमपेक्ष्यासिद्धत्वज्ञानस्य तद्धर्मिकतत्तद्प्रामाण्यनिश्चयाभावकूटस्य च प्रत्येकरूपेणहेतु
तायामेवगौरवं तथापि सिद्धत्वस्यैवतद्व्याप्यवत्वस्यतदवच्छेदकधर्मवत्वस्य वज्ञाने प्रतिबंधक
त्वकल्पनादेवलाघवं सिद्धत्वज्ञानीयतत्तद्प्रामाण्यसंशयव्यक्तीनांप्रातिस्विकरूपेणाभाव
कूटस्यप्रतिबंधकतावच्छेदकीभूतस्य विशेष्यविशेषणाभावेनानंतकार्यकारणभावकल्पनाम
पेक्ष्य च लाघवं ग्राह्यं सिद्धत्वस्य ज्ञानांतरमप्रमेत्यादिरूपाप्रामाण्यज्ञानसत्वेपि सिद्धत्वनिश्चयेने
च्छाप्रतिबंधाद्प्रामाण्यज्ञानसामान्याभावस्य तत्र कत्वासंभवात् नच तत्तद्प्रामाण्यज्ञानाभावकूट

५८

58

विशिष्टसिद्धत्वनिश्चयाभावव्यक्तेरखंडतत्तद्व्यक्तित्वेनैवहेतुत्वादुक्तगौरवानवकाशः प्रतियोग्यविशेषि
ताभावस्यहेतुत्वे तादृशसिद्धत्वनिश्चयाभावसहचरितस्यातिप्रसक्तस्याभावांतरस्यापि तत्तद्व्यक्तित्वे
नहेतुतापत्तेः विशिष्टाभावस्य विशेष्यविशेषणाभावानतिरिक्तत्वे अखंडाभावव्यक्तित्वासंभवा
च्चेत्यंशयः। असिद्धत्वज्ञानार्थमित्यस्य कोर्थः किं स्वरूपासिद्धत्वप्रकारकज्ञानार्थः असिद्धः
त्वविषयकज्ञानार्थं वा नाद्यः इत्याह विशेषेत्यादि उत्पन्नसुखविषयकतत्तद्व्यक्तित्वेन सिद्धत्वनिश्चयेपि
सुखत्वेनासिद्धत्वज्ञानविघातकाभावादिति भावः। ननु विशेषतः सिद्धत्वज्ञानदशायां पक्षतामान्यतो
ऽसिद्धत्वज्ञानेऽन्यविशिष्टधीः अनवधारणात्मनांगीकारादित्यत आह तदिति एकमिति स्वमते
इष्टवेतिपरेषामसिद्धत्वस्याकाचधर्मित्वानस्यैवइष्टाजनकतयाज्ञानद्वयेपितत्संभवादिति भावः। द्वि
तीयेत्वाह सामान्येति सुखत्वादिसामान्यलक्षणया सत्तानासामर्थ्यादिति भावः ननु एवमिच्छायाअनाग

तविषयकत्वप्रकारो व्याहन्येतेत्यत आह वस्तुतस्त्विति॰ वर्त्तमानकालस्य सुखप्रागभाववत्वाद्यनुमितौ वर्त्त
मानकालवृत्तिप्रागभावप्रतियोगित्वादिलक्षणमसिद्धत्वं सुखस्यापि सुग्रहमित्याशयेनाह अयं कालवृत्त्या
दिप्रागभावानभ्युपगमे वर्त्तमानकालध्वंसाधिकरणकालोत्पत्तिकत्वमेवासिद्धत्वं वाच्यमतस्तद्ग्रहार्थं साध्यां
तरमाह सुखेत्यादित्यादि॰ महाप्रलयमनंगीकृत्याह कालत्वादिति॰ तदंगीकारेत्वाह एतादृशेति॰ सुखो
त्पादकालीनध्वंसप्रतियोगिकालत्वादित्यर्थः अनुमानादिति॰ प्रयोजकत्वे पंचमीति नोक्तानुमितेः सा
ध्यादसिद्धत्वमग्राहित्वेपि न क्षतिः तत्सहकारेण मनसैवोत्तरकालमुक्तस्यासिद्धत्वस्य ग्रहसंभवादिति ध्येयं
मिश्रास्तु वर्त्तमानकालवृत्तिप्रागभावप्रतियोगित्वं नासिद्धत्वं विरोधेन प्रामादौ तदभावनिश्चयेपीच्छानु
भवात् किंतु वर्त्तमानकालावच्छेदेन स्वावृत्तित्वमेव तथा सुखादिधर्मिकस्ववृत्तित्वप्रकारकतत्कालीनेच्छां
प्रति सुखादिधर्मिकतत्तत्कालावच्छिन्नस्वावृत्तित्वप्रकारकज्ञानत्वेन हेतुत्वात् अत एव सुखं मे जायता

५९

59

मित्याकारोपीछायाः सर्वजनसिद्धः संशयाभेप्रसिद्धत्वज्ञानस्यजन्यतावच्छेदकतयैवसर्वत्रैश्चासामदशोपरागात् स्वर त्तित्वंतुसुखादेः स्वसमवेतत्वं गकादेः स्वकृतिविषयत्वं प्रागभावादेः स्वीयस्वत्वादिकं यथानुभवमूहनीयं प्रसिद्धत्वज्ञान स्यचिरध्वस्तत्वपक्षे च तत्तत्कालावच्छेदेन स्ववृत्तित्वमेव प्रसिद्धत्वं ग्राह्यमित्याहुः। ननु भाविसुखप्रागभावादिव्यक्तेः पूर्वमज्ञानात्कथं तत्साध्यकानुमितिरत आह निपुणत्वादिः साध्यतावच्छेदकरूपेणैकव्यक्तिज्ञानादेव पक्षधर्म तावत्ताज्ञानाद्रूप्यतासाध्यांतरानुमितेः पाकानुमानिसंपादयिष्यमानत्वादिति भावः। अत्र जातिमत्त्वप्रकारेण व न्हिरूपदर्शायां वह्नित्वेन तत्स्योपनीतप्रत्यक्षात्कुदपाद्वह्नित्वेन तत्ताद्यत्वोपनीतभानं प्रति वह्नित्वेन तत्ताद्य केर्ज्ञानमवश्यंहेतुर्वाच्यं तथा च तत्रैव वह्निस्पृष्टेत तत्ताद्यक्तीनां विशिष्यायादानेपि वह्निस्पृष्टे वह्नित्वेनय स्यकस्यापि ज्ञानमेव च वह्नित्वेन वन्ह्युपनीतप्रत्यक्षं प्रति हेतुः कल्प्यते न तु तत्तद्व्यक्त्यंशं तर्भावेण लाघवादिति वन्हित्वेन कस्यापि ज्ञानसत्त्वे वह्नित्वेन सकलवन्हिप्रत्यक्षं दुर्वारमिति अर्थवशसंपन्नमेव सामान्यलक्षणा

याः प्रत्यासत्तित्वं । नचैवं वह्नित्वेन तत्तद्गुंजोपनीतभानं प्रत्यपि वह्नित्वप्रकारकतत्तद्गुंजाज्ञानत्वेन हेतुत्वं न स्या-
त्सामान्यतो वह्नित्वप्रकारकगुंजोपनीतप्रत्यक्षं प्रत्येव वह्नित्वप्रकारकगुंजाज्ञानत्वेन हेतुत्वकल्पनेन ला-
घवादिति वाच्यं वह्नित्वेनैकगुंजाज्ञानान्तरं तादृशैकगुंजान्तरोपनीतभानस्यानुभवबाधितत्वादेवं तत्तद्गुं-
जान्तर्भावेणाहेतुत्वकल्पनात्प्रकृते च वह्नित्वेनैकवह्निरूपनयोत्तरं तादृश्येण वह्न्यन्तरोपनीतप्रत्यक्षे बाध-
काभावादन्यथा बाधकबलादेव सामान्यलक्षणस्वीकारेण संभवे साधकाभावोपन्यासानौचित्यादित्यस्मद्गुरु-
चरणाः । तच्चिन्त्यं । ननु प्रमेयत्वप्रकारेण घटत्वज्ञानानुत्पन्नस्य प्रमेयघटवानिति निश्चयस्यैव विरोधि घटत्वप्र-
कारकसंशयत्वात्कथं घटो न वेत्याकारस्तादात्म्येन घटस्य संदेहः तत्राह संशयेति । तद्विरोधी घटो न वे-
तिसंशयविरोधी । निष्प्रकारकः निरवच्छिन्नप्रकारताकः । तेन घटत्वांशे सप्रकारकस्यापि स घटः प्रमेयवा-
निति निश्चयस्य स घटो न वेत्याकारसंशयविरोधित्वमक्षतं । नन्वेवमपि घटत्ववानिति निर्णयो घटो न वे-

६०

60

संशयविरोधीनस्यात् घटत्वं वप्रकारत्वादत आह घटत्ववानिति। तथा च तद्वद्वृत्तिधर्मवत्ताज्ञानं तदभाव

व्याप्यवत्ताज्ञानविधयैव तद्वत्त्वज्ञानप्रतिबंधकमिति भावः। ननु प्रमेयत्वादिसामान्यलक्षणेपि वस्त्वाश्रयस्य प

यात्वादेर्निर्विकल्पकं कुतो न जन्यत इत्यत आह सामान्येति। अन्यथा धर्मांतरज्ञानादपि तदाश्रयस्य प्रत्यक्षोद

येन व्यभिचारप्रसंगादिति भावः। ननु सामान्यस्य स्वे सामान्यप्रत्यासत्तिविशिष्टप्रत्यक्षजनकत्वमिव नास्तीत्यत

आह विशिष्टधीसामग्रीति॥ इति सामान्यलक्षणाटिप्पटी समाप्त॥ ॥संवत् १८३३॥ ॥